सप्तमोऽङ्कः

(ततः प्रविशति जीवराजो विज्ञानमन्त्री च ।)

जीवराजः—(सहर्षम्)

मन्त्रिंस्त्वदीयमतिकौशलनौबलेन
तीर्णो रणाम्बुधिरभूदतिदुस्तरोऽपि ।
यस्मिन् भयङ्करगतिर्ज्वरपाण्डुमुख्यो
रोगव्रजः किल तिमिङ्गिलतामयासीत् ॥ १ ॥

ततः प्रविशतीति । पूर्वाङ्कान्तोक्तरीत्या राजा मन्त्री चावशिष्टशत्रुविजयोद्युक्तौ प्रविशतः ।

प्रायः सफलमनोरथत्वात् सहर्षं राजा मन्त्रिणे निर्वृत्तान् वृत्तान्तान् निर्वर्णयन्नाह । **मन्त्रिन्निति** । मन्त्रिन् । यस्मिन्-युद्धाख्ये महार्णवे । भयङ्करगतिः - पूर्वरूपरूपसंप्राप्त्युपशयानुपशयोपद्रवादिरूपप्राणभयोपजनकप्रवृत्तिविशेषविशिष्टः; अन्यत्र तिमिङ्गिलपक्षे, नौकादिभिः संचरतां सांयात्रिकादीनां भयोत्पादकगमनशीलः । ज्वरपाण्डू नाम रोगौ मुख्यौ यस्मिन् सः । रोगाणां कामलाकासश्वासातीसारादीनां व्रजः-समूहः । तिमिङ्गिलतां-तन्नामकमहाक्रूरजलजन्त्वात्मताम् । अयासीत् किल । यस्मिन् महाहवाख्ये महोदधौ मादृशानां मानवानां सुतरां भयावहा ज्वरादयो व्याधिसमूहास्तिमिङ्गिलादिक्रूरयादांसीव सर्वतः सञ्चरन्तः सुबहुसङ्कटमापादयन्त आसन् खलु । तादृशो रणाम्बुधिः । अतिदुस्तरोऽपितथाविधदुष्टजन्तुजालनिचितत्वात् नितरां तरितुमशक्योऽपि सन् । त्वदीयमतिरेव नौः-यानपात्रम्, मत्याः कौशलमेव नौकाया बलम्, तेन त्वदीयमतिकौशल-

किं ब्रवीमि संकुलयुद्धेऽस्मदीयानां तदीयेषु प्रवृत्तमोजायितम् ।

एकत्र मण्डभेदो गुटिकाभेदः परत्र मन्दाग्निम् ।
निखिलामयजननकरं निजघान प्रथममिदमहमदर्शम् ॥ २ ॥

बलेन । तीर्णोऽभूत् । अत एवास्य सहर्षत्वम् । एतच्च पूर्वाङ्कान्तोक्तस्य विषयस्यानुगतत्वात् अङ्कावतरणं नाम नाटकाङ्गम् । निर्वहणसन्धिश्चेत आरभ्यते ॥१॥

किं ब्रवीमीति । संकुलयुद्धे-संक्षोभजनके तुमुलेऽस्मिन् संग्रामे । अस्मदीयानां-अस्मत्पक्षीयाणामौषधादीनाम् । तदीयेषु-अस्मत्प्रतिपन्थिसैन्येषु । प्रवृत्तम् । ओजायितं-शौर्यप्रकटनम् । किं ब्रवीमि-किमिति विवृणुयाम् ; परस्परं व्याकुलोत्पादनरीत्या निर्वर्तमानेऽपि युद्धे मामकाः स्वकीयं निरुपमं शौर्यं प्रयोज्य शत्रून् विस्मयावहरीत्या निष्ठूदयन्ति ; तेषां प्रधने स्वप्रतापप्रकटनस्य प्रवृत्तिप्रकारं न विशदयितुमपि शक्नोमीति भावः ।

तत्प्रकारमेव कथंचिद्विवृणोति **एकत्रेत्यादिना** । निखिलामयानां-ज्वरातिसारशूलामवातादिरूपाणां सर्वेषामपि रोगाणाम् , जननकरं-उत्पादकम् , निदानमिति यावत् । मन्दाग्निं-अग्निमान्द्यं नाम व्याधिम् । "रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि" इति च निदाने रोगसमूहस्याग्निमान्द्यं मूलं भवतीति माधवकरादयः प्राहुः । एकत्र-एकस्मिन् पार्श्वे । मण्डभेदः-वाट्यमण्डलाजमण्डादिभेदभिन्नः सुलघुजीर्यमाणो द्रवाहारविशेषः । परत्र-अन्यस्मिन् पार्श्वे । गुटिकाभेदः-मोदकात्मना कृतो विविधौषधविशेषः ; बाहुशालगुडमरिचादिगुटिकासंजीवनीगुटिकादिभेदेनाग्निमान्द्ये प्रयोजनीया गुटिका बहुविधाः सन्ति । निजघाननाश । इदं-एतत् कर्म । अहं प्रथमम् अदर्शम्-विविधैर्मण्डैः विविधाभिर्गुटिकाभिश्च मन्दाग्नेरभिहननं यदाचरितं तदेव मद्दृष्टिपथमादावागतमिति भावः । (१) **मण्डपाकः**—"जले चतुर्दशगुणे तण्डुलानां चतुष्पलम् । विपचेत् स्रावयेन्मण्डं सभक्तो मधुरो लघुः ॥ नीरे चतुर्दशगुणे सिद्धो मण्डस्त्वसिक्थकः । शुण्ठीसैन्धवसंयुक्तः पाचनो दीपनः परः" इति । (२) **गुटिका**—

अथ गुडूच्यादिपञ्चभद्रकषायौ निकषा यत्नवन्तावलोक्य पलायन्त पित्तसमीरज्वराः। तदनन्तरं जगदन्तरप्रसिद्धः स्वयमनश्वरसारो यक्ष्मपरि-

---

"वटकाश्चाथ कथ्यन्ते तन्नाम गुटिका वटी। मोदको वटिका पिण्डी गुडो वर्तिस्तथोच्यते॥ लेहवत् साध्यते वह्नौ गुडो वा शर्करापि वा। गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी॥ कुर्यादवह्निसिद्धेन क्वचिद्गुग्गुलुना वटिम्। द्रवेण मधुना वापि गुटिका कारयेद्बुधः" इति गुटिकासामान्यलक्षणं शार्ङ्गधरे॥ २॥

अन्यानपि स्वदृष्टान् विषयानाह **अथेत्यादिना**। अथ मन्दाग्निहननानन्तरम्। पित्तसमीरजाः-पित्तेन वातेन वातपित्ताभ्यां च समुत्पन्नास्त्रयोऽपि ज्वरा इत्यर्थः। निकषा-स्वेषां समीपे। यत्नवन्तौ-तादृशरोगनिषूदने समुद्युक्तौ। गुडूच्यादिश्च पञ्चभद्रं च गुडूचीपञ्चभद्रे, तयोः कषायौ-क्काथौ। अवलोक्य, पलायन्त-कान्दिशीका बभूवुः। (१) **गुडूच्यादिक्काथः**—"गुडूचीधान्यकारिष्टरक्तचन्दनपद्मकैः•। गुडूच्यादिगणक्काथः सर्वज्वरहरः स्मृतः" इति। गुडूच्यादिकषायस्यापरो योगः—"गुडूचीधान्यमुस्ताभिश्चन्दनोशीरनागरैः। कृतं क्काथं पिबेत् क्षौद्रसितायुक्तं ज्वरातुरः॥ तृतीयज्वरनाशाय तृष्णादाहनिवृत्तये" इति। (२) **पञ्चभद्रक्काथः**—"पर्पटाब्दामृताविश्वकैरातैः साधितं जलम्। पञ्चभद्रमिदं ज्ञेयं वातपित्तज्वरापहम्" इति सर्वे शार्ङ्गधरसंहितायाम्। **तदनन्तरमिति**। वातपित्तज्वरादीनां विनिपातादनन्तरम। जगदन्तरप्रसिद्धः—जगति सर्वत्र वैद्यविदुषां विदित इत्यर्थः। स्वयम् अनश्वरसारः-स्वभावत एवानिवार्यवीर्यः। यक्ष्मणः परिक्षपणे-हनने, दक्षिणः-शक्तः सन्नपि। त्रैलोक्यचिन्तामणिः-तन्नामकं महौषधम्। संनिपातेन साकं ज्वराणाम् अष्टविधानां-सह सन्निपातेनाष्टविधानां

क्षपणदक्षिणः सन्नपि संननाह स्वयं त्रैलोक्यचिन्तामणिर्विनिपाताय संनिपातेन साकमष्टविधानामपि ज्वराणाम् ।

ज्वराणामित्यर्थः । विनिपाताय-विनाशाय । सन्ननाह-सन्नद्ध आसीत् । यक्ष्मणः प्रतिपन्थिनायकस्यैव विनाशने विशिष्टशक्तियुक्तमपि स्वयमेवेदं रसौषधं ससंनिपातस्य ज्वरसंघातस्य घातायैव प्रथमं प्रसभं प्रयतत इति भावः । वातज्वरः, पित्तज्वरः, श्लेष्मज्वरः, वातपित्तज्वरः, वातकफज्वरः, पित्तकफज्वरः, आगन्तुकज्वरः, सन्निपातज्वर इति सोऽष्टधा । "ज्वरोऽष्टधा पृथक् द्वन्द्वसंघातागन्तुजः स्मृतः" इति निदाने । "मृत्युना सह योद्धव्यं सन्निपातं चिकित्सता" इति सन्निपातज्वरस्य दुश्चिकित्स्यत्वमालोच्य सन्निपातेन साकमिति तस्य सर्वज्वरविशिष्टत्वं संसूचितम् । **त्रैलोक्यचिन्तामणिरसः**—"रसं वज्रं हेमतारं ताम्रं तीक्ष्णाभ्रकं मृतम् । गन्धकं मौक्तिकं शङ्खं प्रवालं तालकं शिला ॥ शोधितं च समं सर्वं सप्ताहं भावयेदनु । चित्रमूलकषायेण भानुदुग्धैर्दिनत्रयम् ॥ निर्गुण्डीसूरणद्रावैर्वज्रिदुग्धैर्दिनत्रयम् । अनेन पूरयेत् सम्यक् पीतवर्णान् वराटकान् ॥ टङ्कणं रविदुग्धेन पिष्ट्वा तेषां मुखं लिपेत् । रुद्ध्वा भाण्डे पुटेत् पश्चात् स्वाङ्गशीतं विचूर्णयेत् ॥ चूर्णतुल्यं मृतं सूतं वैक्रान्तं सूतपादकम् । शिग्रुमूलद्रवैः सर्वं सप्तवारं विभावयेत् ॥ चित्रमूलकषायेण भावनाश्चैकविंशतिः । आर्द्रकस्य रसेनैव भावनाः सप्त कारयेत् ॥ सूक्ष्मचूर्णं ततः कृत्वा चूर्णपादांशटङ्कणम् । टङ्कणांशं वत्सनाभं तत्समं मरिचं क्षिपेत् ॥ चतुर्गुञ्जामितं खादेत् कणाक्षौद्रं लिहेदनु । क्षौद्रैर्वा चार्द्रकद्रावैः शुण्ठ्या वाथ गुडैर्युतम् ॥ वातं विद्रधिपाण्डुशूलग्रहणीरक्तातिसारान् महायक्ष्मप्लीहजलोदराश्मरितृषाशोकान् हलीमं तथा । लूताकृच्छ्रभगन्दरान् ज्वरगणं चार्शांसि कुष्ठं जयेत् साध्यासाध्यरुजो निहन्ति च रसस्त्रैलोक्यचिन्तामणिः" इति योगरत्नाकरे ।

स्थावरजङ्गमगरले ज्वरमामोत्थं व्रणोपजातं च ।
आरोग्यपूर्वचिन्तामणिरपि निघ्नन्मया रणे दृष्टः ॥ ३ ॥

स्थावरेति । आरोग्यपूर्वचिन्तामणिरपि-आरोग्यचिन्तामणिर्नामौषधमपि । रणे रोगसमुदाय-भेषजसमूहाभ्यां निर्वर्त्यमानेऽस्मिन् युद्धे । स्थावरगरलं-ओषधिवर्गादिसम्बन्धिविषम्, जङ्गमगरलं-प्राणिसम्बन्धिविषं च ते । आमोत्थं ज्वरं-आमज्वरं नाम रोगम् । व्रणोपजातं-दुष्टव्रणजसमुद्भूतं ज्वरं च । निघ्नन्-मारयन् । मया दृष्टः-प्रत्यक्षतो मयावलोकितः । एकेनैवौषधेनानेन दशविधेषु स्थावरविषेषु, षोडशविधेषु जङ्गमविषेषु, आमज्वरे, व्रणोत्थे च ज्वरे रणभुवि हन्यमानेषु साक्षादहं तद्व्यतिकरमपश्यमिति महता सन्तोषेण मन्त्रिणे महाराजः प्राह । स्थावरं मूलाद्यात्मकं दशविधं विषम् ; "मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च । निर्यासो धातवश्चैव कन्दश्च दशमः स्मृतः" इति सुश्रुतेनोक्तम् । रसोपरसपाषाणादिसम्बन्धीनि विषाणि धातुविषाणि ; तान्यपि स्थावरविषेऽन्तर्भवन्ति । सर्पादीनां विषाणि जङ्गमविषाणि ; तानि च "दृष्टि-निःश्वास-दंष्ट्रा-नख-मूत्र-पुरीष-शुक्रारा-लाला-स्पर्श-मुखदंश-पर्दित-गुदास्थि-पित्त-शूक-शवभेदात् षोडश" भवन्ति । "लालाप्रसेको हृल्लासहृदयाशुद्धयरोचकाः । तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता ॥ क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः । आमज्वरस्य लिङ्गानि" इति रुग्विनिश्चये **आमज्वरलक्षणम्** । **आरोग्यचिन्तामणिः**—पूर्वस्मिन् अङ्के भूपतिरससिन्दूरेति श्लोकस्य (श्लोक ८०) व्याख्यानेऽस्यौषधस्य दृश्यतां विवरणम् । चिन्तामणिरसस्य योगान्तरमपि विद्यते ; यथा भैषज्यरत्नावल्याम् :—रसविषगन्धकटङ्कणताम्रयवक्षारकं च सव्योषम् । दन्तीफलद्वयं च क्षौद्रं दत्वा शतं वारान् ॥ संमर्द्य रक्तिमित्या वटिकाः कार्या भिषग्वरैः सम्यक् । शुण्ठीपिष्टेन समं खादेदेकां च वा द्वित्राः ॥ संप्राश्य नारिकेलीजलमनुपेयं प्रयुञ्जीत । भेदानन्तरमेव प्रक्षालितभक्तमथ तक्रम् ॥ सैन्धवजीरकसहितं तक्रं पाने प्रयोक्तव्यम् । प्रशमयति सन्निपातज्वरं तथामज्वरं

ततः सर्वज्वरानपि निगृहीतवन्तं ज्वराङ्कुशमुत्तरेण गुल्मार्शस्संग्रह-ग्रहणीर्विपाटितवतो ग्रहणीकपाटस्य पूर्वभागे—

च विषमं च ॥ प्लीहानं चाध्मानं श्वासं कासं विषस्य वेगांश्च । चिन्तामणी रसोऽयं सकलारोग्याय भैरवप्रोक्तः" इति ॥ ३ ॥

तत इति । सर्वज्वरानपि-वातादिभिः समुत्पन्नान् अष्टप्रकारनपि ज्वरान् । निगृहीतवन्तं-निषूदितवन्तम् । ज्वराङ्कुशं नामौषधम् । मया दृष्टमिति पूर्वेणान्वयः । अङ्कुशशब्दःपुंनपुंसकयोः । **ज्वराङ्कुशरसः**—"खण्डितं मृगशृङ्गं च ज्वालामुख्या रसैः समम् । रुध्वा भाण्डे पचेच्चुल्यां यामयुग्मं ततो नयेत् ॥ अष्टांशं त्रिकटुं दद्यान्निष्कमात्रं च भक्षयेत् । नागवल्लीरसैः सार्धं वातपित्तज्वरापहम् ॥ अयं ज्वराङ्कुशो नाम रसः सर्वज्वरापहः" इति शार्ङ्गधरः । पुनः तं ज्वराङ्कुशमुत्तरेण-ज्वराङ्कुशस्योत्तरभाग इत्यर्थः ; 'एनपा द्वितीया' इति द्वितीयान्तत्वम् । गुल्मम्, अर्शः, संग्रहग्रहणीम् इति रोगान् । विपाटितवतः-निहतवतः । ग्रहणीकपाटस्य-तन्नाम्न औषधस्य । पूर्वभागे । युद्धमाचरतो ज्वराङ्कुशस्योत्तरभागे, तथा युध्यतो ग्रहणीकपाटस्य पूर्वभागे च वक्ष्यमाणं बलवदायोधनोद्युक्तम् औषधमप्यद्राक्षमिति संबन्धः । अर्शसो गुल्मस्य च लक्षणादिविवरणं द्वितीयाङ्के व्याख्याने (१७, २३ पद्ययोः) द्रष्टव्यम् । **संग्रहग्रहणी नाम**—"अन्त्रकूजनमालस्यं दौर्बल्यं सदनं तथा । द्रवं शीतं घनं स्निग्धं सकटीवेदनं शकृत् । आमं बहु सपैच्छिल्यं सशब्दं मन्दवेदनम् । पक्षान्मासाद्दशाहाद्वा नित्यं वाप्यथ मुञ्चति ॥ दिवा प्रकोपो भवति रात्रौ शान्तिं व्रजेच्च सा । दुर्विज्ञेया दुश्चिकित्स्या चिरकालानुबन्धिनी ॥ सा भवेदामवातेन संग्रहग्रहणीमता" इति वर्ण्यते रुग्विनिश्चये । **ग्रहणीकपाटरसः**—"रसेन्द्रगन्धातिविषाभयाभ्रं क्षारत्रयं मोचरसो वचा च । जया च जम्बीररसेन पिष्टं पिण्डीकृतं स्याद्ग्रहणीकपाटः" इति योगरत्नाकरे ।

या पञ्चामृतपर्पटी ग्रहणिकायक्ष्मातिसारज्वर-
स्त्रीरुक्पाण्डुगराम्लपित्तगुदजक्षुन्मान्द्यविध्वंसिनी ।
तामद्राक्षमहं रणे स्त्रियमपि व्यातन्वतीं पौरुषं
चामुण्डामिव चण्डमुण्डसमरप्रक्रान्तदोर्विक्रमाम् ॥ ४ ॥

या पञ्चामृतेति । या पञ्चामृतपर्पटी ज्वराङ्कुशमुत्तरेण ग्रहणीकपाटस्य पूर्वभागे च ग्रहण्यादिरोगाणां विध्वंसिनी आसीत् तामप्यहम् अद्राक्षमित्यन्वयः । पञ्चामृतपर्पटी नाम या-यदौषधम् । ग्रहणिका-वातग्रहणी, पित्तग्रहणी, कफ-ग्रहणी, सन्निपातग्रहणी, संग्रहग्रहणीति पञ्चविधोऽयं रोगः; यक्ष्मा-राजयक्ष्मा; अतिसारः-वातपित्तकफसन्निपातशोकामाख्यैर्हेतुभिः व्याधिरेष षोढा भवति; ज्वरः-अष्टविधः पूर्वमपि निर्दिष्टः; स्त्रीरुक्-असृग्दरयोनिव्यापन्मूढगर्भाद्यात्मको बहु-विधः स्त्रीरोगः; पाण्डुगदः-पाण्डुरोगः; स च वातजः, पित्तजः, श्लेष्मजः, सन्निपातजः, मृत्तिकाज इति पञ्चविधः; गरं-पूर्वोक्तं विषम्; अम्लपित्तगदः-उदरे उरसि गले च दाहजनको रोगविशेषः; गुदजानि-अर्शांसि; क्षुन्मान्द्यं-अग्निमान्द्यम्; इत्येतेषां विध्वंसिनी-विनाशिनी । तां-तादृशशक्तिसंपन्नाम् । स्त्रियमपि-जातिस्वभावानुगुण्येन स्वयमबलामपि; पर्पटीशब्दस्य स्त्रीलिङ्गत्वमभि-प्रेत्य तस्यौषधस्य स्त्रीत्वारोपः क्रियते । सत्यपि स्त्रीत्वे तया प्रदर्शितं पौरुष-मसाधारणं दृष्टान्तमुखेन दृढयति चामुण्डामिवेति । चण्डमुण्डाभ्यां-तदाख्याभ्यां प्रचण्डभीमपराक्रमवद्भ्याम् असुराभ्याम्, यः समरः-युद्धम्, तस्मिन् प्रक्रान्तः-प्रकटितः, दोर्विक्रमः-बहुभुजबलशक्तिः यया ताम् । चामुण्डामिव-चण्डिकानाम्नीं बहुविधदेवताशक्तिरूपावयवां देवीं कालिकामिव । रणे-आयोधने । पौरुषं-पराक्रमम् । पुरुषत्वमपीति विरोधाभासश्च । व्यातन्वतीं-विशिष्य प्रकटयन्तीम् । अहम् अद्राक्षम् । यथा चामुण्डी नाम कालिकादेवी चण्डमुण्डधूम्रलोचन-रक्तबीजाख्यान् अनेकानसुरान् स्वयमेकैव समरे पुरा सपदि व्यापादयामास, तथैवैषा पञ्चामृतपर्पट्यपि ग्रहणीप्रभृतीन् परमदुर्जयानामयान् स्वयमेकैव समराङ्गणे

पश्चाद्भागे तस्याः—

अरुचिप्लीहवमिज्वरकासार्शःश्वासशूलानाम् ।
सूक्ष्मैलादिमचूर्णं निरवर्णयमाशु युधि निहन्तारम् ॥ ९ ॥

स्थित्वा सांप्रतमस्मत्पुरत एवाहनदिति भावः । चण्डिकानाम्न्या चामुण्ड्या चण्डमुण्डादीनां संहारं प्रति पूर्वं प्रथमाङ्कव्याख्यायां (४४, ४९ पद्ययोरन्तरा) विवरणं द्रष्टव्यम् । ग्रहण्यादीनां लक्षणानि पूर्वमेव विवृतानि । **अम्लपित्तस्य निदानम्**—"विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपिपानान्नभुजो विदग्धम् । पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्तः ॥ अविपाकक्लमोत्क्लेशतिक्ताम्लोद्गारगौरवैः । हृत्कण्ठदाहारुचिभिश्चाम्लपित्तं वदेद्भिषक्" इति । **पञ्चामृतपर्पटीरसः**—"लोहाभ्रार्कैरसं समं द्विगुणितं गन्धं पचेत् कोलिकाकाष्ठाग्नौ मृदुले निधाय सकलं लोहस्य पात्रे भिषक् । सर्वं गोमयमण्डले विनिहिते रम्भादले विन्यसेत्तस्योर्ध्वं कदलीदलं द्रुततरं सम्यक् पिधानार्थकम् ॥ स्यात् पञ्चामृतपर्पटी ग्रहणिकायक्ष्मातिसारज्वरस्त्रीरुक्पाण्डुगरामूलपित्तगुदजक्षुन्मान्द्यविध्वंसिनी" इति योगरत्नाकरादिषु ! या पञ्चामृतपर्पटीति पद्यस्यास्य पूर्वार्धं वैद्यकग्रन्थादेवोपात्तमिति पूर्वोक्तप्रमाणेनैव सम्यक् ज्ञायते । (अतः पाण्डुगदाम्लेति, गदरुक्क्षुन्मान्द्येति च पाठभेदस्त्वसाधुः ।) ॥ ४ ॥

पश्चाद्भाग इति । तस्याः-पञ्चामृतपर्पट्याः । पश्चाद्भागे पश्चिमप्रदेशे पृष्ठतो वा ।

तत्पश्चाद्भागे किं विद्यत इत्येतदेव विवृणोति **अरुचीति** । अरुचिः-अरोचकः, अन्नेऽनभिलाष इत्यर्थः ; भक्तोपघातमिति चाभिधीयते ; "वातादिभिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगन्धैः । अरोचकाः स्युः" इति तद्रोगस्य हेतुवैविध्यमुक्तम् । प्लीहा-प्लीहाभय उदररोगेष्वन्यतमः, यस्य च विषयो द्वितीयाङ्कव्याख्यायां (श्लो. २३) निरूपितः । वमिः-छर्दिः ; वमनमित्यर्थः ; "अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरति । अकाले चातिमात्रैश्च तथासात्म्यैश्च भोजनैः ॥

तदेतु जलजाक्ष इव दनुजलोकस्य सिद्धयोगः शूकदोषस्य, गोक्षुरकादिचूर्णमिश्रितपयःपानविधिः पुंस्त्वदोषस्य, त्रिविक्रमरसो मूत्रकृच्छ्रा-

---

श्रमाद्व्यायत्तथोद्वेगादजीर्णात् क्रिमिदोषतः। नार्याश्चापन्नसत्त्वायास्तथातिद्रुतमश्नतः॥ बीभत्सैर्हैतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात्। छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः॥ निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः" इति छर्देर्निदाननिरुक्ती। तथा ज्वरः। कासार्शसोरपि विवरणं द्वितीयाङ्कव्याख्याने कृतम्। श्वासः-"यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकः। विष्वग् व्रजति संरुद्धस्तदा श्वासान् करोति सः। महोर्ध्वच्छिन्नतमकक्षुद्रभेदैस्तु पञ्चधा। भिद्यते स महाव्याधिः श्वास एको विशेषतः" इति निदाने माधवकरः। शूलः-कुक्षिशूलाख्यो व्याधिः; परिणामशूलान्नद्रवशूलादिभेदेन स विविधो भवति। एवम् अरोचकादीनां रोगाणाम् आशु-युधि-रणाङ्गणे। निहन्तारं सूक्ष्मैलादिमचूर्ण-तन्नामकमौषधम्। निरवर्णयम्-अद्राक्षम्। **सूक्ष्मैलादिचूर्णम्**—"सूक्ष्मैला पिप्पलीमूलं चव्यचित्रकनागरम्। मरिचं दीप्यकं चैव वृक्षाम्लं चाम्लवेतसम्॥ अजमोदाजगन्धा च कपित्थं चार्धकार्षिकम्। अत्यन्तपरिशुद्धायाः शर्करायाश्चतुष्पलम्॥ चूर्णं सेव्यमिदं कर्षं परमं रुचिवर्धनम्। प्लीहकासावथार्शांसि श्वासं शूलं वमिं ज्वरम्॥ निहन्ति दीपयत्यग्निं बलवर्णकरं परम्। वातानुलोमनं हृद्यं कण्ठजिह्वाविशोधनम्" इति गदनिग्रहे॥ ५॥

तदन्विति। अस्मिंश्च गद्ये विविधानां रोगाणां निवारणोपयोगीनि विविधान्यौषधानि संगृह्यन्ते। दनुजलोकस्य-मधुकैटभप्रभृत्यसुरसमूहस्य। विजयमहोत्सवेन-जयोपजनितप्रमोदप्रकटनार्थं क्रियमाणेन महतोत्सवेन। जलजाक्ष इव-महाविष्णुरिव। शूकदोषादीनां रोगगणानां विजयेन सिद्धयोगादयो भेषजसमूहाः समस्तजनैरप्यस्तूयन्तेत्यन्वयः। जलजाक्ष इव दनुजलोकस्येत्युपमानं वक्ष्यमाणं रोगौषधयुग्मं प्रत्येकशोऽनुबध्नाति। सिद्धयोगः-तन्नामकमौषधम्। शूकदोषस्य-

श्मर्यो:, विष्यन्दनतैलयोगो भगंदरस्य, लघुलङ्केश्वरः कुष्ठस्य, नित्यो-दितरसो मूलानाम्, विद्याधररसो गुल्मानाम्, त्रिनेत्ररसः शूलानाम्,

---

शेफसि समुद्भवतोऽष्टादशसङ्ख्याकस्य विकारसमुदायस्य। निहन्तेति शेषः। (सिद्धवसन्तः शुक्रदोषस्येति पाठान्तरम्।) गोक्षुरकादिचूर्णेन मिश्रितस्य पयसः-क्षीरस्य पानविधिः। पुंस्त्वदोषस्य-षण्डत्वादिरोगस्य, शुक्रदोषोत्पन्नस्य रोग-समूहस्य वा। एवमुत्तरत्रापि ज्ञेयम्। **शुक्रदोषः**—"अक्रमाच्छेफसो वृद्धिं योऽभि-वाञ्छति मूढधीः। व्याधयस्तस्य जायन्ते दश चाष्टौ च शुक्रजाः" इति। **पुंस्त्वदोषाश्च** प्रायः **शुक्रदोषजाः**। "वात-पित्त-श्लेष्म-कुणप-ग्रन्थि-पूति-पूय-क्षीण-मूत्र-पुरीषरेतसः पुरुषाः प्रजोत्पादने न समर्था भवन्ति" इति, "**आसेक्यश्च** सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा। सरेतसस्त्वमी ज्ञेया अशुक्राः षण्डसंज्ञिताः" इति च पुंस्त्वदोषाः शारीरे संगृहीताः। **मूत्रकृच्छ्रम्**—"व्याया-मतीक्ष्णौषधरूक्षमद्यप्रसङ्गनित्यद्रुतपृष्ठयानात्। आनूपमांसाध्यशनादजीर्णात्स्युर्मूत्र-कृच्छ्राणि नृणां तथाष्टौ॥ पृथग्बलाः स्वैः कुपिता निदानैः सर्वेऽथवा कोपमुपेत्य वस्तौ। मूत्रस्य मार्गं परिपीडयन्ति यदा तदा मूत्रयतीह **कृच्छ्रात्**" इति तन्निदानम्। **भगन्दरः**—"गुदस्य द्व्यङ्गुले देशे पार्श्वतः पिडकार्तिकृत्। भिन्ना भगन्दरो ज्ञेयः" इति तल्लक्षणम्। मूलानां-अर्शसाम्। **अर्शांसि**—"**अर्शांसि** षट्प्रकाराणि विद्याद्रुदवलित्रये। दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन्। मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि तान् जगुः" इति। **गुल्मः**—"दुष्टा वातदयोऽत्यर्थं मिथ्याहारविहारतः। कुर्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्गन्थिरूपिणम्॥ तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिवस्तयः। हृन्नाभ्यो-रन्तरे ग्रन्थिः संचारी यदि वाचलः। वृत्तश्चयोपचयवान् स गुल्म इति कीर्तितः" इति। **शूलानि**—"बलासः प्रच्युतस्स्थानात् पित्तेन सह मूर्छितः। वायुमादाय कुरुते शूलं जीर्यति भोजने। कुक्षौ जठरपार्श्वेषु नाभौ वस्तौ स्तनान्तरे। पृष्ठमूलप्रदेशेषु सर्वेष्वेतेषु वा पुनः। भुक्तमात्रेऽथवा वान्ते

महावह्निरस उदररोगाणाम्, गिरिकर्ण्यादिविधिर्गुञ्जातैललेपश्च शिरोरोगस्य, चन्द्रोदयवर्तिश्चक्षूरोगस्य, सौभाञ्जनादिपक्वतैलनिषेकः कर्ण-

---

जीर्णेऽन्ने च प्रशाम्यति । तत्परीणामजं शूलं दुर्विज्ञेयं महागदम् ॥ तमाहू रसवाहानां स्रोतसां दुष्टिहेतुकम् । केचिदन्नद्रवं प्राहुरन्ये तत्पक्तिदोषतः ॥ पक्तिशूलं वदन्त्येके केचिदन्नविदाहजम्" इति भोजादयः । **उदररोगाः**-वात-पित्त-कफ-सन्निपातैश्चत्वारः, प्लीहोदर-यकृदुदर-बद्धोदर-क्षतोदर-जलोदराणीति पञ्च च । "रोगाः सर्वेऽपि मन्देऽग्नौ सुतरामुदराणि च । अजीर्णान्मलिनैश्चान्नैर्जायन्ते मलसंचयात् ॥ रुध्वा स्वेदाम्बुवाहीनि दोषाः स्रोतांसि संचिताः । प्राणान्नपानान् संदूष्य जनयन्त्युदरं नृणाम् ॥ आध्मानं गमनेऽशक्तिर्दौर्बल्यं दुर्बलाग्निता । शोथः सदनमङ्गानां संगो वातपुरीषयोः ॥ दाहस्तन्द्रा च सर्वेषु जठरेषु भवन्ति हि" इति तेषां सामान्यनिदानम् । **शिरोरोगाः**—शिरस्समाश्रित्य जायमाना व्याधयः; तन्निदानं च—"शिरोरोगास्तु जायन्ते वातपित्तकफैस्त्रिभिः । सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा । सूर्यावर्तानन्तवातार्धावभेदशङ्खकैः" इत्युक्तम् । **चक्षूरोगस्य-नेत्ररोगसमुच्चयस्य**—"नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः । शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः ॥ सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु । द्वौ च बाह्याश्रयावन्यावनिमित्तनिमित्तजौ ॥ षट्सप्ततिर्नेत्ररोगाः संग्रहेण प्रकीर्तिताः" इति तत्सङ्ख्या निदाने । **कर्णरोगाः**—कर्णशूलकर्णनाद-बाधिर्यक्ष्वेलस्रावादयो विविधाः । ते च कर्णस्यान्तर्भागं पाल्यादिकं चाश्रिता उद्भवन्ति । कृत्या-आभिचारिकी क्रिया, उन्मादविषज्वराः पूर्वनिर्दिष्टा रोगाः, सर्वग्रहाः-स्कन्दापस्मारादयः समस्ता ग्रहाः । "रोगकृत्याग्रहादीनां निरासः शान्तिरीरिता" इति कृत्याग्रहादीनां शान्तिकर्मविधौ षट्कर्मदीपिकायां बालपीडककृत्याग्रहादयो निर्दिष्टाः । **ग्रहाविष्टलक्षणम्** "क्षणादुद्विजते बालः क्षणात्त्रस्यति रोदिति । नखैर्दन्तैर्दारयति धात्रीमात्मानमेव वा ॥ ऊर्ध्वं निरीक्षते दन्तान्

रोगाणाम्, सिद्धार्थत्रिफलौषधयोगविशेषपानविधिः कृत्योन्मादविष-ज्वरसर्वग्रहाणाम्, मधुसर्पिर्युतचूर्णविशेषलेहनविधिः पाण्डु-हृद्रोगभगन्द-

---

खादेत् कूजति जृम्भते। भ्रुवौ क्षिपति दन्तौष्ठं फेनं वमति चास-कृत् ॥ क्षामोऽति निशि जागर्ति शूनाक्षो भिन्नविट्स्वरः। मांसशोणित-गन्धिश्च न चाश्नाति यथापुरा ॥ सामान्यं ग्रहजुष्टानां लक्षणं समुदाहृतम्" इति निदाने माधवकरः। एवं शूकदोषप्रभृतिप्रमेहान्तानां रोगाणाम्। विजयमहो-त्सवेन-समस्तामयविजयोत्पन्नसन्तोषातिशयेन। समुत्सारिताः-निरस्ताः, सर्व-रोगखेदाः-समस्तव्याधिजनितविविधक्लेशाः यैस्ते; एतच्च पदं सिद्धयोगप्रभृतिमेह-कुञ्जरकेसरिपर्यन्तानाम् औषधनामसूचकानां पदानां विशेषणम्। अत एव सिद्धयोगादय औषधयोगाः सर्वेऽपि समस्तजनैरपि-नीरोगतामधिगतैरशेषैरपि मानवैः। अस्तूयन्त-प्राशंस्त्यन्त। (समरजनैरप्यस्तूयन्तेति पाठे युद्धकर्मणि समुद्यतैरपि जनैरित्यर्थः।) सुमहतां बहूनां व्याधीनां नातिचिरादेव नाशित-त्वात् महावीर्यवतां सिद्धौषधानां महिमा महाजनैः आरोग्यानुभवप्रमुदितैः सुतरामभिनन्दित इति भावः। (१) **सिद्धयोगरसः**—"शुद्धं सूतं द्विधा गन्धं कुर्यात् खल्वेन कज्जलीम्। तयोः समं तीक्ष्णचूर्णं मर्दयेत् कन्यका-द्रवैः ॥ द्रियामान्ते कृतं गोलं ताम्रपात्रे विनिक्षिपेत्। अच्छाद्यैरण्डपत्रेण यामार्धेऽत्युष्णता भवेत् ॥ धान्यराशौ न्यसेत् पश्चादहोरात्रात् समुद्धरेत्। संचूर्ण्य गालयेद्वस्त्रे ध्रुवं वारितरं भवेत् ॥ भावयेत् कन्यकाद्रावैः सप्तधा भृङ्गजैस्तथा। काकमाचीकुरण्टोत्थद्रवैर्मुण्ड्या पुनर्नवैः ॥ सहदेव्यमृतानीली-निर्गुण्डीचित्रजैस्तथा। सप्तधा तु पृथक् द्रावैर्भाव्यं शोष्यं तथातपे ॥ सिद्धयोगो ह्ययं ख्यातः सिद्धानां च मुखागतः" इति शार्ङ्गधरः। (२) **गोक्षुरादि-चूर्णम्**—"गोक्षुरकः क्षुरकः शतमूली वानरिनागबलातिबला च। चूर्णमिदं पयसा निशि पेयं यस्य गृहे प्रमदाशतमस्ति" इति चक्रदत्तः। (३) **त्रिविक्रम-रसः**—"मृतताम्रमजाक्षीरे पाच्यं तुल्ये गते द्रवे। तत्ताम्रं शुद्धसूतं च गन्धकं

च समं ततः ॥ निर्गुण्डुयत्थद्रवैर्मर्द्यं दिनं तद्गोलमन्धयेत् । यामैकं वालुकायन्त्रे पाच्यं योज्यं द्विगुञ्जकम् ॥ बीजपूरस्य मूलं तु सजलं चानुपाययेत् । रसस्त्रिविक्रमो नाम्ना मासैकेनाश्मरीप्रणुत्" इति रसचिन्तामणौ । (४) **विष्यन्दनतैलम्**—"चित्रकार्कौ त्रिवृत्पाठे मलफूहयमारकौ । सुधां वचां लाङ्गलकीं हरितालं सुवर्चिकाम् ॥ ज्योतिष्मतीं च संहृत्य तैलं क्षीरे विपाचयेत् । एतद्विष्यन्दनं नाम तैलं युज्याद्वगन्दरे ॥ शोधनं रोपणं चैव सावर्ण्यकरणं परम्" इति भैषज्यरत्नावल्याम् । (५) **लघुलङ्केश्वरः**—"सूताभ्रशुल्बानि च मारितानि सगन्धकं तालशिला द्रवौ च । विषाम्लवेतौ च समं समस्तं दिनत्रयं चाम्लरसैर्विपेष्यम् ॥ समाक्षिकेणैव मृतेन कुर्याद्वटीं द्विगुञ्जां च शतारुहन्त्रीम् । लङ्केश्वराख्यस्तु रसः प्रसिद्धो निहन्ति कुष्ठान् विविधान् लघुः सः" इति रसकामधेनौ । (६) **नित्योदितरसः**—"मृतसूताभ्रलोहार्कविषं गन्धं भवेत् समम् । सर्वतुल्यं च भल्लातफलमेकत्र चूर्णयेत् ॥ द्रवैः सूरणकन्दोत्थैः खल्वे मर्द्यं दिनद्वयम् । लिहेदाज्ये माषमात्रं रसो नित्योदितोऽर्शसि" इति रसमञ्जर्याम् । (७) **विद्याधररसः**—"पारदं गन्धकं तालं ताप्यं स्वर्णं मनश्शिलाम् । कृष्णाक्काथैः स्नुहीक्षीरैर्दिनैकं मर्दयेद्दृढम् ॥ निष्कार्धं श्लैष्मिकं गुल्मं हन्ति विद्याधरो रसः" इति भैषज्यरत्नावल्याम् । (८) **त्रिनेत्ररसः**—"रसताम्रगन्धकानां द्विगुणान्तरवर्धितांशानाम् । दृढखल्वमर्दितानां पुटपाकानां निषेवितं भस्म ॥ गुञ्जाप्रमाणमार्द्रकसिन्धूद्भवचूर्णसंयुक्तम् । सैरण्डतैलमाक्षिकमथवा तद्विड्गुदुग्धकोपेतम् ॥ शमयति शूलमशेषं तत्तद्रसभावितं बहुशः । उपचूर्णैरनुपानैस्तैस्तैः सहितं कफानिलार्तिहरम् । सघृतमधु पक्तिशूलं शमयति नाम्ना त्रिनेत्ररसः" इति रससारसंग्रहे । (९) **महावह्निरसः**—"चतुस्सूतस्य गन्धाष्टौ रजनी त्रिफला निशा । प्रत्येकं च द्विभागं स्यात् त्रिवृज्जैपालचित्रकम् ॥ प्रत्येकं च त्रिभागं स्यात् त्र्यूषणं दन्तिजीरके । प्रत्येकमष्टभागं स्यादेकीकृत्य विचूर्णयेत् ॥ जयन्तीस्नुक्पयोभृङ्गवह्निवातारितैलकैः । एकैकस्मिन् क्रमाद्भाव्यं सप्तवारं पृथक् पृथक् । महावह्निरसो नाम निष्कमुष्णजलैः पिबेत् ॥ विरेचनं भवेत्तेन तक्रभक्तं ससैन्धवम् । सर्वोदरहरः प्रोक्तो मूढवातहरः परः" इति

रशोफकुष्ठोदरार्शसाम्, मेहकुञ्जरकेसरी प्रमेहाणां च विजयमहोत्सवेन समुत्सारितसर्वरोगखेदाः समस्तजनैरप्यस्तूयन्त। ततः किमवशिष्यते कार्यमस्माकम्।

शार्ङ्गधरः। (१०) **गिरिकर्ण्यादिविधिः**—"मूलं तु गिरिकर्ण्यास्तु शुण्ठी-क्काथेन पेषयेत्। सकुङ्कुमं सहारिद्रं तेनाथ क्काथितेन च। लेपः शिरसि कर्तव्यः शिरोरोगप्रशान्तये" इति वैद्यचिन्तामणौ। (११) **गुञ्जातैलम्**—"गुञ्जाफलैः श्रृतं तैलं भृङ्गराजरसेन च। कण्डूदारुणहृत्कुष्ठकपालव्याधिनाशनम्" इति गदनिग्रहे। (१२) **चन्द्रोदयवर्तिः**—"शङ्खनाभिर्विभीतस्य मज्जा पथ्या मन-श्शिला। पिप्पली मरिचं कुष्ठं वचा चेति समांशकम्॥ छागीक्षीरेण संपेष्य वर्तिं कृत्वा यवोन्मिताम्। हरेणुमात्रां संघृष्य जलैः कुर्यादथाञ्जनम्॥ तिमिरं मांसवृद्धिं च काचं पटलमर्बुदम्। रात्र्यान्ध्यं वार्षिकं पुष्पं वर्तिश्चन्द्रोदयो जयेत्" इति शार्ङ्गधरः। (१३) **सौभाञ्जनादितैलम्**—"सौभाञ्जनस्य निर्यासस्तिलतैलेन पाचितः। सरामठः कर्णरोगशान्तये कर्णपूरकः" इति भैषज्यरत्नावल्याम्। (सौवीरादिपक्कतैलनिषेक इति पाठान्तरम्।) (१४) **सिद्धार्थादिविधिः**—"सिद्धार्थको हिङ्गु वचाकरञ्जौ देवदारु च। मञ्जिष्ठा त्रिफला श्वेता कटभीत्वक् कटुत्रिकम्॥ समांशानि प्रियङ्गुश्च शिरीषो रजनीद्वयम्। बस्तमूलेन पिष्टोऽयमगदः पानमञ्जनम्॥ नस्यमालेपनं चैव स्नानमुद्वर्तनं तथा। अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहः" इति चक्रदत्तः। (१५) चूर्णविशेष इति नवायसचूर्णम् उक्तं भवति; मधुसर्पिर्भ्यां युतः चूर्णविशेषः तस्य लेहनविधिः-आस्वादनक्रमः। **नवायचूर्णम्**—"त्र्यूषणत्रिफलामुस्तविडङ्गदहनाः समाः। नवाय-सरजोभागस्तच्चूर्णं मधुसर्पिषा॥ भक्षयेत् पाण्डुहृद्रोगकुष्ठार्शश्शमनं परम्" इति गदनिग्रहे। (१६) **मेहकुञ्जरकेसरी**—"रसगन्धायसाभ्राणि नागवङ्गौ सुवर्णकम्। वज्रकं मौक्तिकं सर्वमेकीकृत्य विचूर्णयेत्॥ शतावरीरसेनैव गोलीं कृत्वातपे न्यसेत्। बुद्ध्वा शुष्कं तमुद्धृत्य शरावे सुदृढे क्षिपेत्॥ सन्धिलेपं

मन्त्री—स्वामिन्, श्रूयताम्।

जन्यार्णवोऽरिजनितः सुमहानिदानीं
तीर्णोऽप्यतीर्ण इति निश्चिनुते मनो मे।
यन्मत्सरेण रणभुव्युपदिष्टकार्यः
कर्णे स तत्परमितो विदधीत यत्नम् ॥ ६ ॥

मृदा कृत्वा गर्तं तं गोमयाग्निना। पुटेद्यामचतुस्सङ्ख्यं स्वाङ्गशीतं तमुद्धरेत् ॥ श्लक्ष्णखल्वे मृदित्वा तं खादेद्वल्लद्वयं नरः ॥ अष्टादश प्रमेहांश्च जयेन्मासोपयोगतः ॥ अग्नेर्बलं वितनुते मेहकुञ्जरकेसरी" इति योगरत्नाकरे ॥ तत इति। ततः-एवं रोगाणामशेषाणामपि संहारानन्तरम्। अस्माकं-विज्ञानशर्मप्रभृतीनां जीवराजपक्षनिष्ठानाम्। किं कार्यम् अवशिष्यते-कर्तव्यत्वेन सांप्रतमवशिष्टं कर्म किमास्ते; न कोऽपि शत्रुरितःपरं निजबलनिबर्हणशक्तोऽवशिष्ट इति जीवराजोऽभिप्रैति।

न ह्येतावतैव विजयेन निरपाया वयमिति निश्चेतुं शक्यत इति संशयाविष्टं स्वाशयं मन्त्री व्यञ्जयति स्वामिन्निति। श्रूयतां-किं कष्टमद्याप्यस्तीति व्यक्तीकरोम्याकर्ण्यताम्।

जन्यार्णव इति। अरिजनितः-शत्रुभिरुत्पादितः। "अस्मादृशेषु बलशालिषु—" इति, "कोपाध्मातककुत्स्थपुङ्गव—" इति, "गृह्णीयाम व्यथयितुमरेस्तत्पुरं—" इत्येवमादिभिस्तर्जनवचनैः संनिपात-कुष्ठादिभिः संधुक्षितेन पाण्डुना तत्सहचरैश्च साक्रोशमिदं युद्धमारब्धमिति द्वितीयाङ्कस्थविषयैर्ज्ञायेत। सुमहान्-अपार इव पारवारः स्वयं दुस्तरत्वात् सुतरां विशङ्कटः। जन्यं-युद्धमेव अर्णवः-सागरः। "युद्धमायोधनं जन्यम्" इत्यमरः। इदानीं-अस्मिन् समये। तीर्णोऽपि युद्धस्यान्तः समधिगत इव द्योतमानोऽपीत्यर्थः। मे मनः। अतीर्ण इति निश्चिनुते-न ह्यद्यापि युद्धमवसितमित्येव मच्चित्तं निर्धारयतीति यावत्। स्वनिर्णयस्योपपत्तिमाहोत्तरार्धेन यन्मत्सरेणेति। सः-अस्मत्परमशत्रुत्वेन तथा

राजा—विज्ञानसचिव यथार्थनामधेय, मत्सरेण यक्ष्मणः कर्णे किमुक्तं भवेत्। यक्ष्मा च तदाकर्ण्य किं विदध्यात्। तद्विधानेन चास्माकमुत्तिष्ठेत कीदृशमत्याहितम्।

मन्त्री—(क्षणं विचिन्त्य) किमन्यत्। ब्रवीमि। केचिदसाध्यरोगा यक्ष्माणमुपासते। तैरस्मान् बाधितुं यक्ष्माणं प्रति मत्सरेण सङ्केतितमिति शङ्के।

प्रसिद्धः। यक्ष्मा। रणभुवि-युद्धरङ्गे। मत्सरेण-यक्ष्मप्रणिधिना। यत्-यं रहस्यविषयमुद्दिश्य। कर्णे-यक्ष्मणः श्रोत्रान्तिके। उपदिष्टकार्यः जीवपक्षविजयोपायकार्यमुद्दिश्योपजापितः। तत्-तथा मत्सरोपदिष्टं विषयम्। इतः परम विदधीत-कुर्वीत। पूर्वाङ्कावसाने मत्सरेण यक्ष्मणः 'कर्णे एवमिव' इति रहसि य उपजापोऽस्मन्निषूदनोपायमधिकृत्य कृतः, तं कर्मणैवेतःपरं निर्वर्तयितुं यक्ष्मा यतेतेति भावः। अतो मन्त्री मनुते न जन्यार्णवः सांप्रतमपि समभ्वदुत्तीर्ण इति ॥ ६ ॥

विज्ञानसचिवेति। विज्ञानसचिव यथार्थनामधेय-विषयतत्त्वानामतिगूढानामपि अवबोधने वैचक्षण्यविशिष्टत्वात् विज्ञानमन्त्रीति नामास्य नूनमन्वर्थमिति संप्रति राजावगत्य सप्रमोदं तत्संबोधनं सविशेषणमुपयुङ्क्ते। किं रहस्यमुक्तं भवेत्। तत्-मत्सरोक्तं रहस्यम्। किम् अत्याहितं-कीदृशभयावहा व्यापत्। **क्षणं विचिन्त्येति**-मत्सरमन्त्रितस्य छलस्य प्रकारः कीदृशः स्यादिति निपुणमालोच्य। किमन्यत्-मया सुसूक्ष्मं यद्विचार्यते ततोऽन्यत् किं वा भवितुमर्हतीति तात्पर्यम्। ब्रवीमि-मत्सरेण यत् स्वयुक्त्या स्यादालोचितं तदहं वदामि श्रूयतामिति भावः। केचित् असाध्यरोगाः-विषूचिप्रभृतयः। यक्ष्माणम् उपासते-सादरमुपसेवन्ते। तैः-तादृशैः सविस्रम्भं स्वात्मानमनुसरद्भी रोगैः। अस्मान्-अस्मत्पुरमिति यावत्। बाधितुं-उपहन्तुम्। मत्सरेण सङ्केतितं-कपटप्रबन्धः कृतः। इति शङ्के। अनेन च मन्त्रिवितर्केण पूर्वाङ्कावसाने "राजन्,

राजा—(सवितर्कम्) एवमेवास्मासु यक्ष्मा यदि वक्रं विधिमुपक्रंस्यते तत्र कमुपायं पश्यति भवान्।

मन्त्री—'भक्ताय मया कदाचिद्भवते दर्शिष्यते साम्बः।
इति भगवत्या मह्यं जातुचिदावेदितं भक्त्या' ॥ ७ ॥

धैर्यमवलम्ब्यताम्। कृतं शोकेन। सन्ति हि कतिपये देवपादमूलोपजीविनः सैन्याः केनापि दुरपनेयप्रवृत्तयः" इति, "तत्प्रयोगेण कुण्ठितशक्तिर्भविष्यति विज्ञानमन्त्रिहतकः" इति च मत्सरेणोपदिष्टं रहस्यं स्वमतिमहिम्ना विज्ञानशर्मणा समालोच्याविष्कृतमत्र। **सवितर्कमिति**। सवितर्कं-सविमर्शम्। यक्ष्मा अस्मासु एवमेव-भवत्सूचितप्रकारेणैव। वक्रं विधिं-अनार्जवेण पथा किमपि पापकृत्यम्। यदि उपक्रंस्यते-कर्तुमुद्योक्ष्यते चेत्। तत्र-तद्विषये। कमुपायं-तस्य छलकृत्यस्य कीदृशं परिहरणप्रकारम्। भवान् पश्यति-त्वमालोचयसि। अपिनाम शत्रुकृतकूटप्रबन्धस्य कोऽपि निर्मूलनोपायस्त्वयाप्यद्यालोचित इति जीवः सौत्सुक्यं मन्त्रिणं पृच्छति।

प्रतिपक्षप्रयत्नप्रतिहनने सदुपायं समयनियतमुपदिशति **भक्तायेति**। भक्ताय-शिवभक्ताय। भवते-तुभ्यम्। मया-शिवभक्त्या; कर्तृपदमिदम्। कदाचित्-आवश्यकेऽवसरे समुपनते। साम्बः-शिवया सहितः शिवः। दर्शिष्यते-तव संभवतः सङ्कटस्य निवर्तनाय प्रत्यक्षीकरिष्यते। इति-एवमुक्तरीत्या। भगवत्या-महाप्रभावसंपन्नया। भक्त्या-शिवभक्त्या। जातुचित्-पूर्वं कदाचित् शिवभक्त्या-माहितादरेण जीवेन भगवति समुपास्यमाने परमेश्वरे। मह्यं-जीवराजाय। आवेदितं-शिवभक्त्या सादरमभिहितम्। शिवसेवाप्रीतया शिवभक्त्या जीवराजस्य समुपनतात् सङ्कटात् तस्य परित्राणविषये सानुग्रहं यत् प्रतिश्रुतं जीवराजाय, तद्वचनमेवात्र सचिवस्तस्मै श्लोकेनानेन ज्ञापयति। अत्र च "देव, भवान्मामनुस्मृत्य बलवदुत्कण्ठितः प्रकृतकार्यविमुखः संवृत्त इति श्रुत्वा तत्रभवन्तं सान्त्वयितुमागतास्मि। संप्रति विज्ञानमन्त्रिमतानुसारेणैव प्रकृतशत्रुविजयाय व्याप्रियस्व।

इति कदाचित् कथान्तरे देवेनैव मां प्रति प्रागुक्तम्। तदिदानीं तामेव भगवतीं भक्तिं हृदि दृढमवलम्ब्य भगवतः परमेश्वरस्य दर्शनार्थं संनिधानानुग्रहः प्रार्थ्यताम्। तत एवासाध्यरोगाभिभवः सुलभः प्रतिभाति।

राजा—यद्येवम्, अनुध्याय विध्यादिविबुधकृतनिषेवणम्, करोमि मनसा शरणं भुजङ्गाभरणम्। (इत्यनुध्यायति।)

तदनन्तरम्—"निर्जितनिखिलविपक्षं नीरुजपुरसुस्थमपगतातङ्कम्। अहमागत्य विधास्ये परमानन्दाब्धिमाप्तकामं त्वाम्" इति भक्त्या चतुर्थाङ्के यदावेदितं जीवाय (पुटः २१४) तदेव ज्ञापितमिति ज्ञातव्यम्। (अयं च श्लोकः 'भक्ताय भवते कदापि मया दर्शयिष्यते साम्बः' इति भगवत्या तुभ्यं जातुचिदावेदितं भक्त्या इति कदाचित् कथान्तरे—इति विषमया भावरहितया वाक्यरीत्या निर्णयसागरीये कोशे मुद्रितोऽस्ति) ॥ ७ ॥

इतीति। इति-पूर्वश्लोकोक्तरीत्या। कदाचित् कथान्तरे-पूर्वं कदाचित् राजामात्ययोः संवृत्तस्य सल्लापस्य मध्ये। देवेनैव-प्रभुणा भवतैव। मां प्रति प्रागुक्तम्। 'निर्जितनिखिलविपक्षं' इत्यादिरीत्या पूर्वश्लोकव्याख्यासूचितो विषयो मह्यं त्वयैव पूर्वमभिहितः। तत्-तस्माद्धेतोः। तामेव भगवतीं भक्तिं हृदि दृढमवलम्ब्य-अनन्यवृत्तिना मनसा शिवे परमां भक्तिं विधायेत्यर्थः। भगवतः परमेश्वरस्य दर्शनार्थं-परमशिवं साक्षात्कर्तुम्। संनिधानानुग्रहः-यथा शिवस्य साक्षाद्दर्शनं स्यात् तथा तस्य संनिधानप्राप्तये भक्त्यानुग्रहः कार्य इति। प्रार्थ्यतां-शिवभक्त्याः प्रार्थना क्रियताम्। तत एव-तदीश्वरसन्निधानादेव। (भगवद्दर्शनार्थं सन्निधानानुग्रह इति, पाठान्तरम्। भगवतः स्वात्मनो दर्शनार्थमिति च काचित्कः पाठः।) **यद्येवमिति**। यद्येवं-एवंयदि अवश्यकर्तव्यं भवति। तर्हीति शेषः। विध्यादिभिः-

मन्त्री—आश्चर्यमाश्चर्यम् । भक्तवत्सलता भगवतश्चन्द्रचूडस्य परां कोटिमवलम्बते । यदनुध्यानमात्रमनुतिष्ठति स्वामिनि तदाविर्भावसूचनमेतदालक्ष्यते । यत्किल,

शैलस्थूलशिरोभिरुग्रभुजगप्रायश्रवोभूषणै-
र्जानुस्पर्शिबृहत्पिचण्डचटुलैस्तालद्रुदीर्घाङ्घ्रिभिः ।
प्रावृण्णैशतमिस्रनीलतनुभिर्भस्मत्रिपुण्ट्राङ्कितैः
शूलोद्भासिभुजैः समावृतमिदं भूतैरभूद्भूतलम् ॥ ८ ॥

चतुर्मुखप्रभृतिभिः, विबुधैः-देवैः, कृतं निषेवणं-भजनं यस्य तं शिवम् । अनुध्याय-उपास्य । ततः । भुजङ्गाभरणं-शिरोमणिगणविराजमानमहानागभोगैरारचितसर्वाङ्गालङ्करणं भगवन्तं शङ्करम् । मनसा शरणं करोमि-तदेकशरणो भूत्वा ध्यायामि । (मनसा शरणं शङ्करम् इति पाठान्तरम् ।) आश्चर्यमिति । भगवतश्चन्द्रशेखरस्य परां कोटिमारूढं भक्तवात्सल्यं सपदि विभाव्य विज्ञानमन्त्री विस्मितमना आश्चर्यमाश्चर्यमिति सोत्सुकं स्वसंतोषं दर्शयति । यत्-यतः । स्वामिनि-जीवराजे । अनुध्यानमात्रं-केवलं मनसानुस्मरणमेव । अनुतिष्ठति-कुर्वति सति । तस्य-परमेश्वरस्य, आविर्भावस्य-पुरतः प्रादुर्भावस्य, सूचनम् । एतत्-वक्ष्यमाणरीतिको विशेषः । आलक्ष्यते-पुरो दृश्यते । यत्किलेति तमेव विशेषं विवृणोति ।

शैलस्थूलेति । इदं-अस्मत्पुरतो विद्यमानम् । भूतलं-भूप्रदेशः । भूतैः-रुद्रानुचरैः देवयोनिविशेषैः । समावृतं-समन्ततो व्याप्तम् । भूता नाम सर्वदा परमेश्वरस्य सहस्रशः केचनानुचराः सन्ति, ये च गणा इति प्रमथगणा इति च व्यवह्रियन्ते । "आकाशमार्गे गच्छन्तमनुगच्छन्ति नित्यशः । ध्यानस्थं परिचर्यन्ति सलिलादिभिरीश्वरम् ॥ नानाशस्त्रधराः शम्भोर्गणास्तु प्रमथाः

स्मृताः। ते च ख्याताः शङ्करस्य भूताः शम्भुगणा इति" इति महाभारते। (१-११७-१२) सर्वदा समाश्रितभूतगणोऽयमिति कृत्वा भूतेश इति भूतपतिरिति चैष व्यवह्रियते। भूतपतित्वं भूतैरनवरतमनुगम्यमानत्वं चास्य "स्त्रीसंनिकर्षं परिहर्तुमिच्छन् अन्तर्दधे भूतपतिः सभूतः" इति कुमारसंभवे (३-८४), "तद्भूतनाथानुगः" इति रघुवंशे च (२-५८) विद्यते निर्दिष्टम्। "यत्र धूमस्तत्राग्निः" इति न्यायेन, यत्र भूतगणास्तत्र शिवस्यापि सान्निध्यमद्धा भवतीति मत्वा शिवस्याविर्भावसूचकमेतदालक्ष्यत इति पूर्ववाक्ये सूचितम्। यतो भूतैरिदमावृतं स्थलं ततो भूतेशस्याविर्भावश्चात्र यत्सत्यं संभवत्येवेति निर्धार्यैवं मन्त्री राज्ञे निवेदितवान्। भूतानां स्वरूपाणि निरूपयत्यवशिष्टः पद्यभागः। शैलवत् स्थूलानि शिरांसि येषां तैः। उग्राणि-विषोद्गमनदुर्विषहस्वरूपत्वात् उद्वेजकानि, भुजगप्रायाणि-सर्पमयानि, श्रवसां भूषणानि-कर्णाभरणानि येषां तैः। जानू स्पृशन्तीति जानुस्पर्शीनि, जानुपर्यन्तं लम्बमानानीत्यर्थः, अत एव बृहन्ति-स्थूलानि यानि पिचण्डानि-उदराणि तैश्चटुलाः-प्रकम्पमानाः तैः; स्थूलशिरस्कत्वात् लम्बोदरत्वाच्च स्थैर्यमवलम्ब्य स्थातुमशक्ता इति भावः। तालद्रवः-तालवृक्षाः, तद्वत् दीर्घा अङ्घ्रयः येषां तैः। निशायां भवं नैशम्, तमिस्रं-अन्धतमसम्, प्रावृषः-वर्षाकालस्य नैशतमिस्रं प्रावृण्णैशतमिस्रम्, तादृशतमिस्रमिव नीला-अतिकृष्णवर्णा, तनुः-शरीरं येषां तैः। भस्मत्रिपुण्ड्रैः-रेखात्रयात्मना भस्मकृतैः पुण्ड्रैः, अङ्कितैः-लाञ्छितललाटाद्यवयवैः। शूलैः-तन्नामकायुधैः उद्भासिताः-विलसमाना भुजा येषां तैः। एतादृशैर्घोररूपैर्दुर्दर्शनैः सर्वदा शर्वानुगामिभिर्भूतगणैरेष देशः संप्रति सर्वतोऽभिव्याप्त इति तात्पर्यम्। एष च भूतानां वर्णनप्रकारः—

"एतत्पूतनचक्रमक्रमकृतप्रासार्धमुक्तैर्वृका-
नुत्पुष्णत्परितो नृमांसविघसैराघर्घरं क्रन्दतः।
खर्जूरद्रुमदन्नजङ्घमसितत्वङ्नद्धविष्वक्तत-
स्नायुग्रन्धिघनास्थिपञ्जरजरत्कङ्कालमालोक्यते॥" (५-१४)

इति मालतीमाधवे विद्यमानं पूतनाख्यपिशाचानां वर्णनमनुरुणद्धि॥ ८॥

राजा—(ध्यानाद्विरम्य कर्णं दत्त्वा) अहो भाग्यप्रकर्षो जीवलोकस्य । यतः—

जय विश्वपते जयेन्दुमौले जय शम्भो जय शङ्करेति शंसन् ।
परितः श्रुतिगोचरो जनानां कलुषं लुम्पति काहलीनिनादः ॥९॥

मन्त्री—(सहर्षम्) राजन्, फलितस्ते मनोरथः । पश्य पश्य ।

अहो इति । अहो इति परमेश्वराविर्भावोत्पन्नं राज्ञो विस्मयं हर्षं च द्योतयति । जीवलोकस्य-प्राणिसमूहस्य भूलोकस्य वा । भाग्यप्रकर्षः-श्रेयसामुपचयः । जीवलोकः कृतार्थोऽभूदित्यर्थः । यत इति तत्कारणं प्रस्तौति । वक्ष्यमाणः शुभावहः काहलीनिनाद एव ध्यानविरतेः कारणं भवति ।

जयेति । परितः-अस्य प्रदेशस्य समन्तात् । श्रुतिगोचरः-प्राणिनां श्रवणपथविषयीभूतः ; सर्वैः श्रूयमाण इत्यर्थः । काहलीनिनादः-तन्नामकसुदीर्घवाद्योद्भूतध्वनिः । परमेश्वरादीनां प्रस्थानावसरे तादृशानां वाद्यानामुद्घोषणं समुदाचारसिद्धम् । विश्वपते जय । इन्दुमौले-चन्द्रशेखर जय । शम्भो जय । शङ्कर जय । इति शंसन्, सा च काहली जय विश्वपते इत्यादिरूपेण यथा मङ्गलावहान् शब्दानुत्पादयेत् निनादं करोति तथा हन्यत इति भावः । एवं परमेश्वरस्य शुभनामानि जयशब्दोच्चारणपुरस्सरं शंसन् काहलीनिनादो यः समुद्भूतः सः । जनानां कलुषं-पापम् । लुम्पति-निवारयति । अनेन जीवलोकस्य सर्वधा व्यथाहेतोः व्याधिसमूहरूपस्य किल्बिषस्योत्सारणमपि सूचितं भवति ॥ ९ ॥

राजन्निति । ते मनोरथः-व्याधिसमूहरूपदुष्टपरिपन्थिसार्थस्य विजयेन सह प्रमथाधिपस्य साक्षात्कारप्राप्तिरूपः परमाभिलाषः । पश्य पश्येत्याम्रेडनम् ईक्षणगोचरीभूतस्येशानस्यावलोकने महान्तमादरातिशयं सूचयति ।

आरूढः स्फाटिकक्ष्माधरनिभवृषभं सार्धमद्रीन्द्रपुत्र्या
वीतावष्टम्भकुम्भोदरकरयुगलोदस्तमुक्तातपत्रः ।
गायद्गन्धर्वनृत्यत्सुरयुवतिपुरोभागघुष्यन्मृदङ्गो
गङ्गाभृत्युत्तमाङ्गे शशिशकलधरः शङ्करः सन्निधत्ते ॥ १० ॥

सन्निहितं शङ्करं यथावद्वर्णयति **आरूढ** इति । स्फाटिकश्चासौ क्ष्माधरश्च स्फाटिकक्ष्माधरः-स्फटिकशिलामयपर्वतः, तन्निभश्चासौ वृषभश्च तम्; महान्तं स्वच्छश्वेतवृषभमिति यावत् । अद्रीन्द्रः-हिमालयः, तस्य पुत्र्या-पार्वत्या सार्धम् । आरूढः । वीतावष्टम्भं यथा तथा-औद्धत्यं विना, अतिलाघवेनेत्यर्थः; कुम्भोदरकरयुगलोदस्तं-कुम्भोदराख्यस्य प्रमथगणान्तर्गतभूतविशेषस्य हस्तद्वयेनोद्धृतम्, मुक्तातपत्रं-मुक्ताफलैर्निर्मितम् अलङ्कृतं वा छत्रं यस्य सः । गायन्तश्च ते गन्धर्वाश्च गायद्गन्धर्वाः; नृत्यन्त्यश्च ताः सुरयुवतयः-अप्सरसश्च नृत्यत्सुरयुवतयः; गायद्गन्धर्वाः नृत्यत्सुरयुवतयो यस्य पुरोभागे स गायद्गन्धर्व-नृत्यत्सुरयुवतिपुरोभागः; घुष्यन्-ताड्यमानो मृदङ्गो यस्य सः; गायद्गन्धर्वनृत्यत्सुरयुवतिपुरोभागश्चासौ घुष्यन्मृदङ्गश्चेति तथोक्तः । (नृत्यत्सुरगणिकपुरोभागेति पाठो न सङ्गतः ।) गङ्गां बभर्तीति गङ्गाभृत्, तस्मिन् गङ्गाभृति-धृतगंङ्गासरितीत्यर्थः । उत्तमाङ्गे-शिरसि । शशिशकलं-चन्द्रकलाम्, धत्त इति शशिशकलधरः । शङ्करः-परमेश्वरः । सन्निधत्ते-निकषास्माकमाविर्भवति । परमेश्वरः पार्श्वोपविष्टपार्वत्या साकम् अत्यच्छवलक्ष्मं महोक्षमधिरूढः, कुम्भोदराख्यपारिषदकरपरिगृहीतमुक्तातपत्र-परिष्कृतमूर्धभागः, आत्मनः पुरस्तात् सप्रमोदं गायद्भिर्गन्धर्वैः, नृत्यन्तीभिर्देवाङ्गनाभिः, अपरैश्चाहतमृदङ्गादिवाद्यैरनुचरैः सादरं सानन्दं च पुरस्कृतः, गङ्गातरङ्गोपवीज्यमाने स्वोत्तमाङ्गे चारुतमां चन्द्रकलां च समुद्वहन् सार्वाङ्गीणैः साम्बशिवलक्षणैः शोभमानो भक्तानुग्रहायात्रैव स्वयमाविरासीदिति भावः ॥ १० ॥

अपि च,

मौलिन्यस्ताञ्जलीनां दरमुकुलितदृङ्निर्यदानन्दबाष्प-
क्लिद्यद्गण्डस्थलानामविरलपुलकालङ्कृतस्वाकृतीनाम् ।
वेदान्तप्रायभूरिस्तुतिमुखरमुखाम्भोजभाजामृषीणां
पङ्क्त्या पाश्चात्यभागो झटिति निबिडितो दृश्यतामस्य शम्भोः ॥

राजा—मन्त्रिन्, इतःपरं प्रणिपातादिना भगवन्तं प्रसाद्य स्वाभीष्टमर्थं प्रार्थयिष्ये ।

मौलिन्यस्तेति । अपि च दृश्यताम् एष च भगवतो महिमाविशेषः; कः स इति चेत्—मौलिन्यस्ताञ्जलीनां-शिरस्सु बद्धहस्ताञ्जलिपुटानाम् । दरमुकुलितेभ्यः-ईषदाकुञ्चितेभ्यः, दृग्भ्यः-नेत्राञ्चलेभ्यः, निर्यद्भिः-स्रवद्भिः, आनन्दबाष्पैः-परमेश्वरावलोकनजनितपरमानन्दोत्थिताश्रुजालैः, क्लिद्यन्ति-आर्द्रीकृतानि, गण्डस्थलानि कपोलप्रदेशाः येषां तेषाम् । अविरलैः-अतिनिबिडैः, सर्वत्राङ्कुरा इवोत्थितैरिति यावत्, पुलकैः-रोमाञ्चैः, अलङ्कृताः-भगवद्ध्यानानन्दस्य परमाशासनीयस्य सूचकत्वात् भूषणैर्भूषिता इव द्योतमाना इति भावः, स्वेषां-मुनीनाम्, आकृतयः-तनवो येषां तेषाम् । वेदान्तप्रायाः-औपनिषदसूक्तिस्वरूपाः या भूरिस्तुतयः-निरवधिकस्तोत्राणि, ताभिः मुखराणि-शब्दायमानानि मुखाम्बुजानि भजन्तीति भाजाम्; वेदान्तार्थप्रतिपादकैः पावनैः स्तवैः प्रणिपतता-मित्यर्थः । ऋषीणां-तत्काले सरभसमुपासनार्थमुपनतानां मुनीनाम् । पङ्क्त्या-गोष्ठ्या । अस्य-अस्मत्पुरत इहाविर्भूतस्य । शम्भोः-परमेश्वरस्य । पाश्चात्यभागः-पश्चिमो भूदेशः । झटिति-सहसा । निबिडितः-सान्द्रमभिव्याप्तः । दृश्यतां-भवतो भागधेयवशात् भगवतः सान्निध्यं मुदा मुनिवरैरपि साम्प्रतमनुभूयते, भवता तदप्यवलोक्यतामिति भावः ॥ ११ ॥

मन्त्रिन्निति । प्रणिपातादिना-प्रणामादिना; आदिशब्देन स्तुत्यर्चनादयो गृह्यन्ते । प्रसाद्य-प्रीणयित्वा । स्वाभीष्टमर्थं-देहस्य नीरोगतापादनाद्द्वारा त्रैवर्गिकादि-

मन्त्री—अनितरसाधारणमेतस्य भक्ताभीप्सितप्रदानचातुर्यम् । यः प्रसादितवते पार्थाय पाशुपतमस्त्रं प्रतिपादितवान् । येन च निखिलक्षत्रियकुलजिघांसवे भार्गवाय प्रसादीकृतः परशुः ।

श्रेयस्साधनात्मकमात्मीयं मनोरथरूपप्रयोजनम् । **अनितरेति** । एतस्य-परमेश्वरस्य । भक्तानाम् अभीप्सितस्य-अभिलषितार्थस्य, प्रदाने चातुर्यं सामर्थ्यम् । अनितरसाधारणं-अन्यादृशम् । तस्यौदार्यस्यान्यादृशत्वमेव दृष्टान्तैर्दृढयति **य इति** । यः-पशुपतिः । प्रसादितवते-आत्मानमनुग्राहयितुं संतोषितवते । पार्थाय-अर्जुनाय । पाशुपतमस्त्रं-तदाख्यं बलवच्छत्रुनिबर्हणोपयोगि शिवदेवताकं मन्त्ररूपमुपकरणम् । प्रतिपादितवान्-अर्पितवान् । दृष्टान्तान्तरमाह **येन चेति** । येन-शिवेन च । निखिलक्षत्रियाणां कुलस्य-हैहयाधिपादीनाम् अशेषाणामपि क्षत्रियाणां परम्परायाः, जिघांसवे-हन्तुमुद्युक्तवते । (जिघृक्षवे इति पाठस्तु न संगतः ।) भार्गवाय-परशुरामाय । परशुः-कुठाराख्यमायुधम् । प्रसादीकृतः-सानुग्रहमर्पितः । (१) परमेश्वरप्रसादात् पार्थेन पाशुपतास्त्रस्यावाप्तिश्च "ततः पाशुपतं दिव्यमवाप्य पुनरीश्वरात् । संहृष्टरोमा दुर्धर्षः कृतं कार्यममन्यत" इति महाभारते (द्रोण. ८१-२२) भवत्यभिहिता । इममेव विषयं प्रधानतो विस्तरतश्च प्रतिपिपादयिषुः

"आस्तिक्यशुद्धमवतः प्रियधर्म धर्मं धर्मात्मजस्य विहितार्गसि शत्रुवर्गे ।
संप्राप्नुयां विजयमीश यया समृद्ध्या तां भूतनाथ विभुतां वितराहवेषु ॥
इति निगदितवन्तं सूनुमुच्चैर्मघोनः प्रणतशिरसमीशः सादरं सान्त्वयित्वा ।
ज्वलदनलपरीतं रौद्रमस्त्रं दधानं धनुरुपपदमस्मै वेदमभ्यादिदेश"

इति भारविरपि किरातार्जुनीये व्याचष्टे । (२) परमेश्वरोपासनया भार्गवो रामः परशुमस्त्राणि चान्यानि तस्मादवापेति, क्षितिमपि त्रिस्सप्तकृत्वः स्वयमक्षत्रामकरोदिति च महाभारते—"सोऽपि पुत्रं ह्यजनयज्जमदग्निः सुदारुणम् । सर्वविद्यान्तगं श्रेष्ठं धनुर्वेदस्य पारगम् ॥ रामं क्षत्रियहन्तारं प्रदीप्तमिव पावकम् । तोषयित्वा स

राजा—उपपन्नमिदम्। एवमपरिमितानि महान्त्याश्चर्यचरितानि देवस्य। यच्च कपिलमुनिकोपानलभस्मीकृतप्रपितामहसङ्घसमुत्तारणकृतप्रयत्नभगीरथप्रसादितायाः सुरापगाया भुवमवतरन्त्या गर्वभञ्जनं नाम मृत्युञ्जयस्य चरितं तदपि परमाद्भुतमेव।

ईशानं पर्वते गन्धमादने ॥ अस्त्राणि वरयामास परशुं चातितेजसम्। स तेनाकुण्ठधारेण ज्वलितानलवर्चसा ॥ कुठारेणाप्रमेयेण लोकेष्वप्रतिमोऽभवत्" इति च (शान्ति. अ. १२) अभिहितमास्ते। **उपपन्नमिति**। उपपन्नमिदं-यत् त्वयोक्तं तद्युक्तमेव। देवस्य-महादेवस्य। प्रथमाङ्के त्रिपुरान्तकस्य प्रभावप्रकटनात्मके एवमेव ४२ पद्ये, तदनन्तरं विद्यमाने 'एवमपरिमितान्याश्चर्यचरितानि देवस्य' इत्यादि वाक्ये च विषयतादात्म्यमवलोक्यताम्। कपिलमुनेः-अधोभुवने तपसि स्थितवतस्तदाख्यस्य नारायणांश भूतस्य महर्षेः, कोपानलेन-अस्मत्पितुः सगरस्य याज्ञिकतुरगापहर्तायमेव मुनिरिति स्वस्य निकृतिं कृतवत्सु सगरात्मजेषु संजातेन क्रोधाग्निना, भस्मीकृताः प्रपितामहसङ्घाः-अंशुमतः पितामहाः षष्टिसहस्रसंख्याकाः सागराः, तेषां समुत्तारणाय-पापनिवारणपूर्वकं नाकलोकप्रापणाय, कृतप्रयत्नेन भगीरथेन प्रसादितायाः।

"सर्वे सपर्वतामुर्वीं खनन्तः सगरात्मजाः।
चक्रुर्जर्झरितध्वान्तं नागलोकं नखांशुभिः ॥
त एते तपसा दीप्ते तमः-स्तोमप्रमाथिनि।
कापिले ज्वलने वीरा लेभिरे शलभोपमाम्"

इति (चम्पूरामायणस्था १-७०) कथात्रानुसन्धेया। (कोपानलेति शब्दः क्वचित् पुस्तके नास्ति।) सुरापगायाः-देवगङ्गायाः। भुवमवतरन्त्याः-गगनात् पर्वतराजशिखरे निपतन्त्याः। गर्वभञ्जनं नाम मृत्युञ्जयस्य चरितं-गङ्गापगागर्वनिर्वापणाख्या परमेश्वरकथा। यत्-रामायणादिषु प्रसिद्धमास्ते। तदपि परमाद्भुतमेव-श्रोतृणाम्

मन्त्री—जगत्प्रसिद्धमेवेदम् । तथाहि—

वेगाकृष्टोडुचक्रानुकरणनिपुणश्वेतडिण्डीरखण्डा-
श्लिष्टोर्मीनिर्मितोर्वीवलयविलयनाशङ्कसातङ्कदेवा ।
विभ्रश्यन्त्यभ्रगङ्गा विबुधजनमुवः सर्वदुर्वारगर्वा
निर्विण्णा धूर्जटीयोद्भटघटितजटाजूटगर्भे निलिल्ये ॥ १२ ॥

आश्चर्यावहमेव भवति । जगत्प्रसिद्धं तदेव परमेश्वरस्यापदानं तथाहीति साभ्युपगमं मन्त्री विवृणोति ।

वेगाकृष्टेति । वेगेन-अतितरसा, आकृष्टस्य-अपहृतस्य, उडुचक्रस्य-नक्षत्रसमूहस्य, अनुकरणे-तद्वत्प्रतिभासने, निपुणैः-स्वेषां रूपैर्यथावन्नक्षत्रमण्डलस्य विसंवादं सर्वात्मनाचरद्भिरित्यर्थः ; श्वेतडिण्डीरखण्डैः-पाण्डुरफेनशकलैः, आश्लिष्टाभिः-व्याप्ताभिः, ऊर्मीभिः-महावीचिभिः, निर्मितस्य-निर्वर्तितस्य, उर्वीवलयविलयनस्य-भूमण्डलाप्लावनस्य; जगत्प्रकाण्डोत्पन्नैकोदकात्मकमहाप्रलयरूपावस्थाविशेषस्येति यावत् ; आशाङ्का-वितर्को येषां ते, अत एव सातङ्काः-व्यथाविशिष्टाः ; आशङ्क-सातङ्कशब्दौ देवशब्दस्य विशेषणीभवतः ; विलयनाशङ्काश्च सातङ्काश्च देवाः यया सा । गङ्गाया अकाण्डोत्पन्नं प्रबलप्रवाहप्रक्षोभं प्रसमीक्ष्य विबुधा अपि महाप्रलयो महीविलयनाय किमाविरभूदिति सुतरामुद्विग्नमानसा अभूवन्निवेति भावः । विबुधजनानां-गीर्वाणगणानाम्, भूः-देशः, स्वर्ग इत्यर्थः, तस्याः ; गगनमार्गादिति यावत् । विभ्रश्यन्ती-निपतन्ती । (विभ्रम्याकाशगङ्गेति पाठान्तरम् । विधिभुवनभुव इति पाठो न समञ्जसः ।) अभ्रगङ्गा-आकाशगङ्गा । या सर्वदुर्वारगर्वा-अपरैरनिवारणीयदर्पविशिष्टा । अभूदिति शेषः । तथा दर्पोद्धता देवगङ्गा । धूर्जटीयस्य-शम्भुसम्बन्धिनः, उद्भटघटितजटाजूटस्य-सप्रगल्भम् उद्धतस्य महाजटानां कलापस्य, गर्भे-महाकुहररूपे मध्यभागे । निर्विण्णा-भग्नगर्वत्वात् अवसन्नवीर्यत्वाच्च सुतरामुद्विग्ना उपरतगर्वा च सती, निलिल्ये-लीना बभूव । एष च

किञ्च, अध्वरविधावपराधिनो दक्षप्रजापतेः शिक्षणावसरे रोषसंधुक्षितेन भगवता विष्टपगुरुणा शिपिविष्टेन सृष्टः स्वांशभूतः प्रभूतकोपविधूत-विनयमुद्रो वीरभद्र एव किं किं न कृतवान्। तथा हि—

कथासंग्रहो यथा रामायणे—"तदा सातिमहद्रूपं कृत्वा वेगं च दुस्सहम्। आकाशादपतद्राम शिवे शिवशिरस्युत ॥ अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा। विशाम्यहं हि पातालं स्रोतसा गृह्य शङ्करम् ॥ ज्ञात्वावलेपनं तस्या क्रुद्धस्तु भगवान् हरः। तिरोभावयितुं बुद्धिं चक्रे त्रिणयनस्तदा ॥ सा तस्य पतिता पुण्या पुण्ये रुद्रस्य मूर्धनि। हिमवत्प्रतिमे राम जटामण्डलगह्वरे ॥ सा कथञ्चिन्महीं गन्तुं नाशक्नोद्यत्नमास्थिता। नैव निर्गमनं लेभे जटामण्डलमोहिता" इति। किञ्च—शब्दसरण्या चार्थभङ्ग्या च

"अथ वीचीचयच्छन्नदिगन्तगगनान्तरा।
शशाङ्कशङ्खसंभिन्नतारामौक्तिकदन्तुरा ॥
तरङ्गाकृष्टमार्ताण्डतुरङ्गायासितारुणा।
फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा ॥
आवर्तगर्तसंभ्रान्तविमानप्लवविप्लवा।
नीलजीमूतशैवालकृतलेखा हरित्तटा ॥
अवलेपभराक्रान्ता सुरलोकतरङ्गिणी।
पपात पार्वतीकान्तजटाकान्तारगह्वरे ॥
अलब्धनिर्गमा शम्भोः कपर्दादमरापगा।
दधौ दूर्वाशिखालग्नतुषारकणिकोपमाम्" इति

गङ्गागर्वभङ्गाख्यस्य गङ्गाधराख्यानस्य वर्णनं चम्पूरामायणकृतं प्रायोऽनुसृत्य पद्यमिदं पठितमिति प्रतिभाति ॥ १२ ॥

तस्यापदानान्तरमप्युदाहरति **किञ्चेति**। अध्वरविधौ-दक्षप्रजापतिकृत-वाजपेयाख्ययज्ञकर्मणि। अपराधिनः-जामातरि (स्वसुतास्वन्यतमायाः सत्या भर्तरि)

शूलाग्रक्षतदक्षकण्ठरुधिरैः शोणे रणप्राङ्गणे
कीर्णो दन्तगणश्चपेटदलितादर्कस्य वक्त्रान्तरात् ।
वीरश्रीकरपीडनोत्सवविधावेतस्य वैश्वानर-
प्रक्षिप्तोज्ज्वललाजविभ्रमकरो नालोकि लोकेन किम् ॥ १३ ॥

शिवे द्वेषात्तमध्वरायानाहूय विहितागसोः दक्षप्रजापतेः शिक्षणावसरे । रोष-संधुक्षितेन-स्वतिरस्कारजनितेन क्रोधेन, स्वभार्यायाः सत्या योगाग्निप्रवेशस्य दक्षोऽयं हेतुरभूदिति कोपेन च प्रचोदितेन; हेतुद्वयजनितमहाक्रोधोज्जृंभितेनेति यावत् । विष्टपगुरुणा-चराचरगुरुणा । शिपिविष्टेन-शिवेन । "कस्तं चराचरगुरुं निर्वैरं शान्तविग्रहम्" इति श्रीभागवतेऽस्ति चराचरागुरुत्वविशेषणं प्रयुक्तमीश्वरस्य (४-२-२) । सृष्टः-स्वस्य क्रोधाग्नेरुत्पादितः । स्वांशभूतः-रुद्रांशसंभूतः । (रोषसंधुक्षितेन नीललोहितेन विसृष्टः स्वांशभूत इति पाठान्तरम् ।) प्रभूतकोपेन-निरवधिकेनानिवार्यप्रवृत्तिमता क्रोधेन, विधूता परास्ता, विनयमुद्रा-सौशील्यलक्षणं येन सः । दक्षकृतमहापराधसमुद्भूतेन क्रोधेन दूरापनीतशालीनतादिगुण इत्यर्थः । वीरभद्र एव-तदाख्यः प्रधानो गणाधिनाथ एव । किं किं न कृतवान् । वीरभद्रो बहूनि रणवीरोचितानि कार्याण्यकरोदेवेति प्रतिपादयितुं तथाहीत्याह—

शूलाग्रेति । शूलाग्रेण-त्रिशूलाख्यस्यायुधविशेषस्यस्य कोटिभागेन, क्षतस्य-विद्धस्य, दक्षकण्ठस्य-दक्षप्रजापतिकन्धरस्य, रुधिरैः-रक्तैः । शोणे-अतीव रक्तवर्णे । रणप्राङ्गणे-युद्धरङ्गे । अर्कस्य-सूर्यस्य । चपेटदलितात्-वीरभद्रस्य हस्ततलप्रहारेण शकलितात् । वक्त्रान्तरात्-आस्यस्यान्तर्भागात् । कीर्णः-समन्ताद्विशीर्णः । दन्त-गणः-सूर्यस्य दशनानां निकरः । दक्षाभियोगाय प्रसभं प्रवृत्ते रुद्रांशसंभूते वीरभद्रे, तत्र सत्राय समुपागतानां दिवौकसां वीरभद्रस्य च निर्वर्तमाने तुमुले परस्परायोधने, दक्षे च तदा वीरभद्रेण शूलाग्रक्षते, तदङ्गान्निस्सृतेनासृक्पूरेण तद्रणाङ्गणं रक्तवर्णमभूदिति, तस्मिंश्च व्यतिकरे प्रमथाधिपमनाहूयैवाध्वरप्रवर्तन-मनुज्ञातवत्स्वन्यतमस्य वीरभद्रकरतलेन कपोले प्रहतस्य तपनस्य मुखात्

प्रच्युतास्तद्दन्ता विशीर्णाश्चाभवन्निति भावः। एतस्य-वीरभद्रस्य। वीरश्रियः-शौर्यलक्ष्म्याः, युद्धविजयाधिगतजयलक्ष्मया इत्यर्थः, करपीडनं-पाणिग्रहणम्, तदाख्य उत्सवविधौ, वीरश्रीनामककामिन्या वीरभद्रेण समुपनते विवाहकर्मणीति भावः। वैश्वानरे-उद्वाहार्थं प्रज्वलिते वह्नौ, प्रक्षिप्तानां-हुतानाम्, उज्ज्वललाजानां धावल्यभासुराणां भर्जितहोमतण्डुलानाम्, विभ्रमं करोतीति विभ्रमकरः-भ्रान्तिजनकः; अयं दन्तगण इत्यस्य विशेषणम्। एष व्यतिकरश्च लोकेन-जनेन। किं नालोकि-अपि नाम न दृष्टः; सम्यक् आलोकित एवेत्यर्थः। शोणितसेकशोणवर्णे रणाङ्गणे विकीर्णा विवस्वतो धवला दन्ताः वीरभद्रस्य वीरश्रीविवाहोत्सवावसरे ज्वलति वह्नौ ह्यमानं श्वेतं लाजाञ्जलिमनुकुर्वन्तीति तात्पर्यम्। पुरा किल हिमवतः पृष्ठे दक्षप्रजापतिर्यज्ञं महान्तमाहरत्। इन्द्रेण सहिताः सर्वे यज्ञभागिनो देवा मुनयश्च दक्षेणामन्त्रिताः। चर्मधारी भस्मरूषितः पन्नगभूषितः श्मशानवासी विषमलोचनो भूतसंवृतो धूर्जटिश्चैष इति मत्वा परमेश्वरं स्वजामातरमपि स नाह्वयत्। स्वपतिः-स्वपित्रा सुतरामवमानित इति दक्षसुता सती सुदूरं विमनायमानमानसा योगाग्निना स्वात्मानमदहत्। दक्षकृतामवज्ञां स्वपत्नीविनाशजं दुःखं चासहमानः शिवः परां कोटिमारूढः क्रोधस्य। तदानीं तच्छरीरात् तत्क्रोधप्रतिरूपको वीरभद्र इति रौद्रः पुरुषः समुदभवत्। स च दक्षं दक्षयज्ञं च ध्वंसयामासेति महाभारतादिषु (शान्ति. अ. २९०) प्रसिद्धा कथा। कथामिमामनुसृत्यैव

"अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी।
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे"

इति कालिदासोऽपि कुमारसंभवे प्राह। "ततः स्वभर्तुश्चरणाम्बुजासवं जगद्गुरोश्चिन्तयती न चापरम्। ददर्श देहे हतकल्मषा सती सद्यः प्रजज्वाल समाधिनाग्निना" इति, "पूष्णश्चापातयद्दन्तान् कलिङ्गस्य यथा बलः। शप्यमाने गरिमणि योऽहसद्दर्शयन् दतः" इति च सत्या योगाग्निना देहत्यागम्, वीरभद्रेण दिनमणेर्दशनपातनमप्यधिकृत्य श्रीभागवते (४-५) दृश्यमानं प्रमाणम्। यज्ञभागग्रहणं नाम देवगणेषु प्रथितानां सर्वेषामपि आविष्णोः प्रभावस्य प्रति-

राजा—किमिति वर्ण्यतामयमाश्चर्यचर्यो भगवान् ।

क्रोधारूढभ्रुकुटिरलिके क्रूरखड्गप्रहार-
च्छिन्नग्रीवत्रिदशनिकरच्छन्नसङ्ग्रामभूमिः ।
शक्रश्रीदद्रुहिणशरणालाभविद्राणविद्या-
दानोन्निद्रः प्रणतजनताभद्रदो वीरभद्रः ॥ १४ ॥

पत्तये प्रधानं प्रत्यभिज्ञानमिति वैदिकानां निर्णयः । परमेश्वरस्यापि तद्वैशिष्ट्यं समुत्पन्नमिति कालिदासोऽपि "यज्ञभागजुषां मध्ये पदमातस्थुषा त्वया । उच्चैर्हिरण्मयं शृंगं सुमेरोर्वितथीकृतम्" इति प्रशंसते । (कुमार. ६. ७२) ॥ १३ ॥

किमितीति । अयं-वीरभद्रः । आश्चर्यचर्यः-अद्भुतकार्यकर्ता । भगवान् । किमिति वर्ण्यतां-केन प्रकारेण वर्णनं क्रियेत । अनन्तप्रभावस्यास्य वर्णनं समग्रतो नैव सुलभमिति भावः ।

तस्यानितरसाधारणं विक्रममेव वर्णयति **क्रोधारूढेति** । अलिके ललाटतटे । क्रोधेन-स्वस्यावज्ञां विधाय दक्षेणारब्धेऽध्वरकर्मणि आहितासक्तिमत्सु आदितेयेषु समुद्भूतकोपेन, आरूढा-उपर्युच्छ्रिता, भ्रुकुटिः-भ्रुवोः कुटिलीकरणं यस्य सः । अत एव क्रूरखड्गस्य-अतितीक्ष्णकरवालस्य, प्रहारेण छिन्ना ग्रीवा येषां तेषाम्, तादृशानां त्रिदशानां-देवानाम्, निकरः-समूहः, तेन च्छन्ना-निरन्तरमावृता, सङ्ग्रामभूमिः-दक्षाध्वरध्वंसाय प्रवृत्तयुद्धाङ्गणं येन सः । क्रोधोद्भतवीरभद्रविच्छिन्न-विविधविबुधानामसुभिर्विरहितानामङ्गैरभिव्याप्तमायोधनाङ्गणमित्यर्थः । शक्रः-इन्द्रः, श्रीदः-कुबेरः, द्रुहिणः-ब्रह्मा एतेभ्यः शरणालाभेन-रक्षणस्याप्राप्त्या, विद्राणं-पलायनम्, सैव विद्या-पलायनविधानमित्यर्थः, तस्य दाने उन्निद्रः-उद्युक्तः; एतत्प्रतिपन्थिनाम् अनेन समुपजनिते भये नान्यत्र शरणमुपलभ्यत इति भावः । (शक्रश्रीशेति पाठान्तरम् ।) तादृशोऽपि वीरभद्रः । प्रणतजनतायाः-शरणमुपगतस्य जनसमूहस्य, भद्रदः-श्रेयःप्रदः । भवतीति शेषः । अत्र च रुद्रेण ध्वस्तस्य

कः पुनरस्य स्वरूपं तत्त्वतः शक्नोत्यवधारयितुम् । यदन्तर्वाणयः सर्वेऽपि स्वच्छन्दानुरोधात् कलयन्ति स्वरूपमेतस्य । तथाहि—

दक्षस्य दक्षाध्वरस्य देवगणस्य च पश्चात् परमेश्वरकृतं परित्राणनं निर्दिष्टं भवति । सा च कथा—"अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः । संछिन्नभिन्नसर्वाङ्गाः सर्त्विक्सभ्या भयाकुलाः ॥ स्वयंभुवे नमस्कृत्य कात्स्न्र्येनैतन्न्यवेदयन् । तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि । पुंसि क्षेमाय सा भूयान्न प्रायेण बुभूषताम् ॥ आशासाना जीवितमध्वरस्य लोकस्सपालः कुपिते न यस्मिन् । तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः ॥ स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः । ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः ॥ तस्मिन् महायोगमये मुमुक्षुशरणे सुराः । ददृशुर्देवमासीनं त्यक्तामर्षं पुरान्तकम् ॥ तथापरे सिद्धगणा महर्षिभिर्ये वै समन्तादनुनीललोहितम् । नमस्कृतः प्राह शशाङ्कशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ॥ जाने त्वामीश विश्वस्य जगतो योनिबीजयोः । शक्तेश्शिवस्य च परं यत्तद्ब्रह्म निरन्तरम् ॥ कुर्वध्वरस्योद्धरणं हतस्य भोस्त्वया समाप्तस्य मनोः प्रजापतेः । न यत्र भागं तव भागिनो ददुः कुयज्वनो येन मखो निनीयते ॥ इत्यजेनानुनीतेन भवेन परितुष्यता । अभ्यधायि महाबाहो प्रसह्य श्रूयतामिति ॥ नाघं प्रजेश बालानां वर्णये नानुचिन्तये । देवमायाभिभूतानां दण्डस्तत्र धृतो मया ॥ प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः । पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् ॥ देवाः प्रकृप्तसर्वाङ्गा ये म उच्छेषणं ददुः । बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृतबाहवः" इत्यादिभिर्विस्तरेण श्रीभागवते (४ स्कन्धे, ६. ७.) द्रष्टव्या ॥ १४ ॥

कः पुनरिति। अस्य-वीरभद्रात्मकस्य रुद्रस्य । स्वरूपम् । तत्त्वतः-याथार्थ्येन । अवधारयितुं-ज्ञातुम् । कः शक्नोति । यत्-यस्माद्धेतोः । सर्वेऽपि अन्तर्वाणयः-तत्त्वविदः शास्त्रज्ञाः । स्वच्छन्दानुरोधात्-स्वेच्छयेत्यर्थः । एतस्य स्वरूपं कलयन्ति-येन येन यथा ध्यायते तत्तद्रूपेण तं वर्णयन्ति । "अन्तर्वाणिः शास्त्रवित् स्यात्" इति वैजयन्ती ।

कर्तारं कतिचित् किलानुमिमते कार्यैर्यमुर्व्यादिभिः
केऽप्याहुः पुरुषस्य यस्य पुरतः सृज्यं प्रकृत्या जगत् ।
क्लेशैः कर्मभिराशयैश्च सकलैरस्पृष्टरूपोऽखिल-
प्रज्ञोऽनादिगुरुः स ईश्वर इति व्याख्यन्ति केचित्तु यम् ॥ १९ ॥

तत्त्वज्ञानां विविधानाशयानेव विशदयति कर्तारमिति । कतिचित्-केचन शास्त्रज्ञाः । यं-परमेश्वरम् । कार्यैः-कार्यत्वेन जगत्युपलभ्यमानैः । उर्व्यादिभिः-पृथिव्यादिभिः पञ्चभिर्भूतैः । कर्तारं-तेषां भूतानां कारणभूतम् । अनुमिमते-अनुमानेन शंसन्ति । किलेति प्रसिद्धौ । कारणं विना कार्याणामसंभवात् । त्वमेव लोककर्ता, त्वत्तो लोका उद्भवन्तीति तात्पर्यम् । "जगद्योनिरयोनि-स्त्वम्" इति कालिदासः (कु. २. ९.); "यतो वा इमानि भूतानि जायन्ते" इति श्रुतिप्रमाणं च । (कार्यार्थमुर्व्यादिभिरिति निर्णयसागरीयः पाठस्त्वसङ्गतः ।) केऽपि-अन्ये केचन । यस्य पुरुषस्य-महेशस्य । पुरतः-अग्रे; तदिच्छानुरोधेनेति तात्पर्यम् । प्रकृत्या-त्रिगुणात्मकया प्रधानाख्यया च मायया । जगत्-भुवनम् । सृज्यं-स्रष्टव्यम् । इति चाहुः-व्यवहरन्ति । प्रधानम्, अव्यक्तम् इत्यादिनाम-विशिष्टा मूलप्रकृतिरेषा शिवशक्तिरिति, तमाश्रित्य जगत्सृष्टिमाचरतीति च तत्त्वज्ञा आमनन्ति । "प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा। एतानि तस्या नामानि शिवमाश्रित्य या स्थिता" इति, "अचेतनापि चैतन्ययोगेन परमात्मनः । अकरोद्विश्वमखिलं पुरतो नाटकाकृति" इति च शार्ङ्गधरः स्वसंहितायाः पूर्वखण्डे । "केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः । एतदेव प्रजासृष्टिं करोतीश्वरचोदितम्" इति च मात्स्ये (अ. ३) । "मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्" इति गीता (९-१०) । "केचिदेकं वदन्त्येतद्ब्रह्म लोकप्रवर्तकम् । केचिद्वदन्ति द्विविधं ब्रह्म-प्रकृतिपूर्वकम्" इति महाभारतीयः (मोक्षधर्मे) आशयभेदश्च सूचितः । "क्रिया-शक्तिं केचिदनुजमथनीं हेतिमपरे मनस्तत्त्वं चान्ये मधुविजयिनस्त्वामभिदधुः" इति सङ्कल्पं प्रति सङ्कल्पसूर्योदये पुरुषकृतमभिवर्णनमेष स्मारयति उल्लेखः ।

अपि च,

श्रुतमिति निगमान्तेष्वेकमेवाद्वितीयं
निरवधि परिपूर्णं ब्रह्म सच्चित्सुखाय ।
विलसति किल यस्मिन् विश्वमेतत्तमिस्रे
स्रजि फणिवदबोधादित्थमाहुः किलान्ये ॥ १६ ॥

केचित्तु-अपरे तु केचन ज्ञातारः । स ईश्वरः । सकलैः । क्लेशैः-कायिकैर्मानसिकैश्च दुःखैः, आध्यात्मिकादिभिर्दुःखैश्च ; अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेश इति पञ्चभिः क्लेशैर्वा । "क्लेशेषु पञ्चसु गतेषु" इति प्रबोधचन्द्रोदये । (६-१) कर्मभिः-जन्ममरणादिहेतुभूतैः कायवाङ्मनोभिः कृतैः पुण्यपापरूपैः कर्मभिः । आशयैश्च-इच्छाभिश्च । अस्पृष्टं-अनाक्रान्तं रूपं-स्वरूपं यस्य सः । रजस्तमोभ्यामाविर्भूतैः क्लेशकर्मादिभिरनासक्त इत्यर्थः । "स हि देवः परं ज्योतिस्तमःपारे व्यवस्थितम्" (कुमा. २-५८) इति, "न च मां तानि कर्माणि निबध्नन्ति" (गीता: ९-९) इति, "असङ्गो ह्ययं पुरुषः" इति च श्रुत्यादयः । अखिलप्रज्ञः-सर्वज्ञः । "कृशानुरेताः सर्वज्ञो धूर्जटिः" इति तस्य सर्वज्ञ इति नाम प्रकृतिसिद्धम् । अनादिगुरुः-चराचराणां पुराणगुरुः । इति च यं-ईश्वरम् । व्याख्यन्ति-विविधैः प्रकारैर्व्याचक्षते । अतः स्वरूपमस्य यस्तत्त्वतोऽवधारयितुं शक्नोति स दुर्लभ इति पूर्ववाक्येन योजनीयम् ॥ १५ ॥

श्रुतमिति । एकमेव । तथा अद्वितीयं-न विद्यते द्वितीयं यस्य । एकत्वस्य निराबाधतास्थापनाय अद्वितीयमिति विशेषणम् । निरवधि-अनन्तम् । परिपूर्ण-अखण्डम् ; देशकालाद्यपरिच्छिन्नमित्यर्थः । सत्-सत्यम् । चित्-ज्ञानात्मकम् । ब्रह्म-पूर्वोक्तगुणैरन्वितं ब्रह्माख्यं तत्त्वम् । सुखाय-शाश्वतानन्दाय मोक्षात्मकाय । भवतीति शेषः । इति-पूर्वोक्तप्रकारेण । निगमान्तेषु-वेदान्तेषु । श्रुतं-ब्रह्मविद्यासक्तचित्तानां सतां गोचरत्वेन पठितमास्त इत्यर्थः । "एकमेवाद्वितीयं ब्रह्म", "सत्यं ज्ञानमनन्तमानन्दं ब्रह्म" इत्यादिकं श्रुतिवाक्यमिह प्रमाणम् ।

मन्त्री—तत्तादृशमेनमवाङ्मनसगोचरमहिमानं पङ्कजासनपाकशासनप्रभृतयो देवाः प्रणमन्ति भगवन्तम्। अतः सेवावसरं प्रतिपालय क्षणमात्रम्।

राजा—सम्यङ्निरूपितममात्येन।

"एकमेव सदा ब्रह्म सत्यमन्यद्विकल्पितम्" इति कृष्णमिश्रादयः। यस्मिन्-ब्रह्मणि। एतत् विश्वं-एतद्दृश्यमानं जगत्। अबोधात्-अज्ञानात्, अविद्यायाः प्रसंगादित्यर्थः। तमिस्रे-अन्धकारे। स्रजि-पुष्पमालायाम्। फणिवत्-सर्पज्ञानवत्। विलसति किल-भ्रमवशात् प्रतिभाति खलु। इत्थं-एवं प्रकारेणापि। अन्ये किलाहुः-अपरे शास्त्रज्ञा वदन्ति नाम। "यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथात्मानम्" इति तैत्तिरीयारण्यके पठ्यमानरीत्या तस्मिन् सर्वमिदं जगत्प्रोतमिव प्रतिभाति। किन्त्वद्वैतिनामाशयानुरोधेन तदविद्यानिष्पन्नं मिथ्याज्ञानमिति ज्ञेयम्। पुष्पस्रजि तमसि स्थितायां पन्नगज्ञानवत् भ्रान्तिमूलकमिति चाभिधीयते। अस्य चाशयस्य "एको देवो बहुधा निविष्टः," "एकं सन्तं बहुधा कल्पयन्ति", "एकस्तथा सर्वभूतान्तरात्मा" इत्यादिश्रुतीः प्रमाणयन्ति। मतमिदमेव कृष्णमिश्रश्च साधु निरूपयत्येवम्—

अभ्भश्शीतकरान्तरिक्षनगरस्वप्नेन्द्रजालादिवत्
कार्यं मेयमसत्यमेतदुदयध्वंसादियुक्तं जगत्।
शुक्तौ रूप्यमिव स्रजीव भुजगः स्वात्मावबोधे हरा-
वज्ञाते प्रभवत्यथास्तमयते तत्त्वावबोधोदयात्॥ इति।

भक्त्या प्रसेदुषः परमेश्वरस्य प्रत्यक्षीकरणोपनतं परमानन्दमेवं जीवराजस्तत्सचिवश्च पारस्परिकेन वाक्प्रसङ्गेन सप्रमोदमाविरकुरुताम्॥ १६॥

तत्तादृशमिति। तत्तादृशं-पूर्वोक्तप्रकारादिगुणविशिष्टम्। अत एव अवाङ्मनसगोचरमहिमानं-वाक् च मनश्च वाङ्मनसे, तयोः गोचरो वाङ्मनसगोचरः, स न भवतीति अवाङ्मनसगोचरः, अवाङ्मनसगोचरो महिमा यस्य तम्।

नमदमरसहस्रमौलिमालापरिगलितैर्भुवि पारिजातपुष्पैः ।
अलिकुलमनवाप्तदिव्यगन्धग्रहणकुतूहलि कृष्यते समन्तात् ॥ १७ ॥

मन्त्री—अवसरोऽयमखिलसुरासुरगुरोः सरोरुहाकरसंवेशविद्यादेशिककलाशेखरस्य सेवनाय देवस्य । अत एव—

वाङ्मनसेति अचतुरेत्यादिना अच्प्रत्ययान्तो निपातः । एनं भगवन्तं-परमेश्वरम् । पङ्कजासनपाकशासनप्रभृतयः-ब्रह्मेन्द्रादयः । देवाः प्रणमन्ति । अतः-ब्रह्मेन्द्रादिकृतेश्वरसेवाया अवकाशदानस्यावश्यकत्वात् । सेवावसरं-अस्मदपेक्षितेश्वरभजनस्यावकाशम् । क्षणमात्रं प्रतिपालय । **सम्यगिति** । अमात्येन सम्यङ्निरूपितं-त्वया यथावदालक्षितम् ।

मन्त्रिनिरूपितमेव विषयं यथावद्वर्णयति **नमदमरेति** । भुवि-भूतले । नमत्-प्रणामं कुर्वत्, यत् अमरसहस्रं-सहस्रसङ्ख्याको देवगणः, तस्य मौलिमालाभ्यः-शिरसि धृतपुष्पस्रग्भ्यः, परिगलितैः-परिच्युतैः; भुवि परिगलितैरित्यन्वेतव्यम् । पारिजातपुष्पैः-तदाख्यदेवतरुकुसुमैः । अनवाप्तस्य-भ्रमरकुलेनानासादितस्य, दिव्यगन्धस्य-देवतरुसुमनःपरिमलस्य, कुतूहलमस्यास्तीति कुतूहलि, दिव्यगन्धस्य ग्रहणे कुतूहलि-दिव्यपुष्पपरिमलानुभवोत्सुकमिति यावत् । अलिकुलं-मधुकरनिकुरुम्बम् । समन्तात्-सर्वेभ्योऽपि सन्निकृष्टप्रदेशेभ्यः । कृष्यते-बलादावर्ज्यते । अत्र सन्निहितस्य भगवतो भूतेशस्य चरणयोः प्रसभं प्रणमतां प्रजापतिप्रमुखानां दिवौकसां सुबहूनामुत्तमाङ्गेषु धृताभ्यः कुसुमस्रग्भ्यः स्वयं परिच्युतानां दिव्यपुष्पाणां दुर्लभस्य सौरभ्यस्यास्वादनाय तत्कुसुमनिकरावर्जिता मधुकरव्राताः संमन्ततः समायान्तीति वर्णनमुखेन मन्त्रिनिरूपितं देवगणकृतं भगवत्सेवौत्सुक्यं महाराजो विशिष्य न्यरूपयत् ॥ १७ ॥

अवसर इति । अखिलसुरासुरगुरोः-अशेषाणां आदित्यानां दैत्यानां च आचार्यस्थानीयस्य । सरोरुहाकराणां-पद्माकराणाम्, कुशेशयकुलानामिति यावत्; संवेशः-निद्रा, मुकुलीभाव इत्यर्थः; संवेशविद्या-निमीलनकला, तस्यां देशिकस्य-

संभ्रान्तनन्दिकरघूर्णितवेत्रपात-
भीतापगत्वरगणव्रजवर्जितेन ।
एतेन कीर्णकुसुमेन पथा महेशं
सेवस्व भक्तिमददुर्लभसंनिधानम् ॥ १८ ॥

इन्दोः, कला-नीरजानां निमीलनकर्तुश्चन्द्रस्य कलेत्यर्थः ; सा शेखरः-शिरोभूषणं यस्य तस्य ; चन्द्रशेखरस्येत्यर्थः । "स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि" इत्यमरः । सेवनाय-नमस्कारादिना पुरस्काराय । देवस्य-प्रभोस्तव । अयमवसरः-एष एव समुचितः सन्दर्भः । अत एव-एतस्मादेव हेतोरिति वक्ष्यमाणपद्येनान्वयः ।

संभ्रान्तेति । संभ्रान्तस्य-इतस्ततः ससंभ्रमं गतागतं कुर्वाणस्य, नन्देः-नन्दिकेश्वराख्यस्य शिवानुचराध्यक्षस्य, करेण घूर्णितस्य-सत्वरं हस्तेन प्रचालितस्य, वेत्रस्य पातात्-वेत्रदण्डपातोपनतप्रहारादित्यर्थः ; भीतानाम् अतएव अपगत्वराणां-अपक्रमणशीलानाम्, गणानां-प्रमथगणाह्वयरुद्रानुचराणाम्, व्रजेन वर्जितेन-परित्यक्तेन । नन्दिकेश्वरहस्तधृतवेत्रपातभीत्या दूरापसृतप्रमथगणेनेत्यर्थः । "गत्वरश्च" इति क्वरवन्तनिपातात् अपगत्वराणामित्यत्र गत्वरेति रूपम् । कीर्णकुसुमेन-सेवोपनतसुरासुरमुकुटेभ्यः पतितैः अपरैरर्हणार्थं प्रक्षिप्तैश्च कुसुमनिकरैराकीर्णेन । एतेन पथा-पुरतो दृश्यमानेन मार्गेण । भक्तिमतां-भवादृशानाम् अकृत्रिमभक्तिसंपन्नानाम्, अदुर्लभं-सुलभम्, संनिधानं-संनिकर्षे दर्शनदानं यस्य तम् ; भवादृशभक्तिमतां सुलभमित्यर्थः । महेशं-परमेश्वरम् । सेवस्व-प्रणामादिभिर्भज । परमेश्वरसेवाया अवकाशस्य दिष्ट्योपलब्धत्वात् अद्यैवोपसृत्योपचर्यतामेष भवतेति सप्रमोदं सचिवः प्रेरयति राजानम् ॥ १८ ॥

(ततः प्रविशति यथानिर्दिष्टः परमेश्वर्या सह परमेश्वरः ।)

परमेश्वरः—अयि गिरीन्द्रसुते,

अनितरसाधारणया भक्त्या जीवस्य मामनुस्मरतः ।
सपदि मयास्य पुरस्तात् संनिहितं सपरिवारेण ॥ १९ ॥

देवी—देव, तुरिअं तुह आगमणं एव्व दंसेदि अणण्णतुल्लं भत्तवच्चलत्तणम् ।
[देव, त्वरितं तवागमनमेव दर्शयत्यनन्यतुल्यं भक्तवात्सल्यम् ।]

राजा—(मन्त्रिणा सह त्वरितमुपसृत्य)

ततः प्रविशतीति । यथानिर्दिष्टः-संभ्रान्तेतिपद्यप्रतिपादितप्रकारमनतिक्रम्य विलोक्यमानः । परमेश्वर्या सह-पार्वत्या साकम् ।

अनितरेति । अयि गिरीन्द्रसुते-पार्वति । अनितरसाधारणया-अनितरसामान्यया । भक्त्या । मां-परमेश्वरम् । अनुस्मरतः-अनुपदं ध्यायतः । अस्य जीवस्य-जीवराजस्य । पुरस्तात्-अन्वक्षम् । सपरिवारेण मया-प्रमथगणादिपरिवारसहितेन मया । सपदि-आकस्मिकतयेत्यर्थः । संनिहितं-तदनुग्रहार्थम् उपस्थितम् । अस्य जीवस्य प्रबलया भक्त्या समावर्जितेन मया प्रसन्नेन स यत्रास्ते तत्र स्वयं सत्वरं सन्निहितव्यमासीदिति भावः ॥ १९ ॥

देवेति । तव । त्वरितम् आगमनमेव-अविलम्बितोपस्थितिरेव । तव भक्तवात्सल्यं-भक्तविषयकं त्वदीयं प्रेमातिशयम् । अनन्यतुल्यं-अनितरसाधारणम् । दर्शयति-प्रकाशयति । जीवस्य त्वयि यथा भक्तिरनितरसाधारणा तथा तवापि तस्मिन् अनितरसामान्यं वात्सल्यं च विद्यत इति विस्पष्टं ज्ञायत इति भावः । (अणण्णतुल्लं भत्तिमत्तणम्-अनन्यतुल्यं भक्तिमत्वम् इति पाठान्तरम् ।)

मन्त्रिणेति । त्वरितम् उपसृत्य-ससंभ्रमं मन्त्रिणा सह परमेश्वरसविधमधिगत्य ।

विधिहरिविषमेक्षणात्मकः सन् सृजति विभर्ति निहन्ति यो जगन्ति ।
तमहममलमेकमेव सच्चित्सुखवपुषं परमेश्वरं नतोऽस्मि ॥ २० ॥

(इति मस्त्रिणा सह प्रणमति)

परमेश्वरः—वत्स, मन्त्रिणा सममभिमतेन युज्यस्व ।

जीवः—(मन्त्रिणा सहोत्तिष्ठन्, शिरस्यञ्जलिं बध्वा)

विधिहरीति । यः-शिवः । विधिहरिविषमेक्षणात्मकः—ब्रह्मविष्णुत्रिनेत्राख्यमूर्तित्रयरूपः सन् । जगन्ति-भुवनानि । सृजति-स्वयं परमेष्ठित्वेन तिष्ठन् उत्पादयति । बिभर्ति-विष्ण्वात्मकः सन् तान् लोकान् पालयति । निहन्ति-रुद्ररूपमवाप्य संहरति च । तं-सकलचराचरात्मकलोकसृष्टिस्थितिसंहारकर्मणामद्वितीयहेतुभूतं तथाविधम् । अमलं-दोषरहितम् । एकमेव-मूर्तित्रयात्मना भिन्नत्वेनापाततोऽवगम्यमानमपि वस्तुतोऽद्वितीयस्वरूपम् । सच्चित्सुखवपुषं-ज्ञानानन्दात्मकम् । परमेश्वरम् । नतोऽस्मि-प्रणमामि । दृश्यतां कुमारसंभवे—

"नमस्त्रिमूर्तये तुभ्यं प्राक् सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥"
"तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥"
"एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ"

इत्यादिभिः कालिदासो मूर्तित्रयस्वरूपं स्तवरूपेण तत्र तत्र वर्णयति ॥ २० ॥

वत्सेति । मन्त्रिणा समं-त्वत्सचिवेन विज्ञानशर्मणा सह । अभिमतेन युज्यस्व-अभिलषितेन मनोरथेन संयोगं प्राप्नुहि; तव च मन्त्रिणश्च मनोरथपूर्तिर्भूयादित्यर्थः ।

(१) जय जय जगदीश देवासुरावध्यतादर्पवेगोद्धृतत्वत्पदाङ्गुष्ठ-निष्पीडनस्तब्धकैलासमूलार्तदोर्विंशतिप्रस्तुतस्तोत्रपुष्यद्दयारक्षितोन्मुक्त-लङ्कापते निष्प्रपञ्चाकृते। (२) अनुपमितगृहीततारुण्यलक्ष्मीनिरीक्षोन्मिषद्दारुकारण्यनारीव्रतभ्रंशकुप्यन्मुनीन्द्राभिचारोत्थितं तुङ्गनादं कुरङ्गं

जय जयेति। त्रिभिर्दण्डकैः परमेश्वरमभिष्टौति। (१) जगदीश। देवासुरैः अवध्यतायाः-आत्मनो हननाशक्यतया, देवानां दानवानां च हस्तात् स्वस्यापजयो मरणं वा न कथंचिदपि स्यादिति धैर्येणेति यावत्; तज्जातो यो दर्पवेगः-अवलेपातिशयः, तेन उद्धृतस्य-विंशत्या भुजैरुत्थापितस्य, ततश्च त्वत्पादाङ्गुष्ठनिष्पीडनेन-परमेश्वरचरणाङ्गुष्ठकृतबलवन्मर्दनेन, स्तब्धस्य-उद्धर्तुमशक्यत्वात् निश्चलतां प्राप्तस्य च, कैलासस्य, मूले-अधोभागे, आर्ताः-पीडिताः, दोर्विंशतिः- विंशतिसंख्याका बाहवः यस्य सः; (इदं लङ्कापतिशब्दस्य विशेषणम्) तेन हेतुना प्रस्तुतं-रावणारब्धं स्तोत्रं यस्मै सः; (एतत् परमेश्वरविशेषणम्) तेन हेतुना पुष्यद्दयया-अभिवृद्धया तावकानुकम्पया, रक्षितश्चासौ उन्मुक्तश्च रक्षितोन्मुक्तः; बाहूनां भङ्गभयाद्रक्षितः पर्वतमूलपीडनाद्विमुक्तश्च, लङ्कापतिः-रावणो येन सः; तस्य संबोधनम्। निष्प्रपञ्चाकृते-अविस्तृतात्मरूपिन्; अणुस्वरूपिन्नित्यर्थः; यद्वा केवलनिर्गुणात्मक। (प्रथमद्वितीयदण्डकयोर्मध्ये वक्ष्यमाणं दण्डकान्तरमपि क्वचिद्दृश्यते—

" जननमरणलाभपौनःपुनीदीनतद्वज्ञनारब्धघोरव्रतप्रीणितत्वत्कठोरश्रवःप्रार्थनाजातकोपोत्थशापामिषाशीभवत्तापसत्राणकृद्रामरूपग्रह स्वेषु सानुग्रह।" इति।)

(२) अनुपमितेति। अनुपमितं-उपमानरहितं यथा तथा, गृहीतामहादेवेनोपात्ता, या तारुण्यलक्ष्मीः-यौवनसंपत्, तस्या निरीक्षया-मुनिभार्याभिः कृतेनावलोकनेन, उन्मिषत्-झटिति समुत्पन्नः, यो दारुकारण्यनारीव्रतभ्रंशः-दारुकवनावस्थितमुनिपत्नीनां समुपनतः पातिव्रत्यभङ्गः, तेन कुप्यतां-प्राप्तक्रोधानाम्, मुनीन्द्राणां-महर्षीणाम्, अभिचारेण-अहितोत्पादकेन आथर्वणकर्मणा,

ज्वलज्ज्वालमग्निं कराभ्यां वहन् दृश्यसे सद्भिरामृश्यसे । (२) कलशभवमहर्षिवातापिनिर्वापणे दक्षिणोर्वीभरापोहने विन्ध्यसंस्तम्भने सिन्धुनाथाम्बुनिःशेषपाने च शक्तिप्रदायिस्वपादाम्बुजध्यानमाहात्म्य शम्भो नमस्ते नमस्ते पुनस्ते नमः ॥ २१ ॥

उत्थितं-उत्पन्नम् । तुङ्गनादं-कर्णकठोरनिनादं कुर्वाणम् । कुरङ्गं-हरिणम् । ज्वलज्ज्वालं-ज्वलन्तीभिर्बह्वीभिर्ज्वालाभिरन्वितम् । अग्निं-तन्महर्षिकृताभाचारिकं वह्निं च । कराभ्यां वहन्-एकेन हस्तेन कुरङ्गम् अपरेणाग्निं च धारयन् । दृश्यसे । दारुकारण्ये कदाचिद्द्रुतं सकलस्त्रीकुलावर्जकरूपसंपन्नस्य तरुणस्य रूपं गृहीत्वा शिवोऽयं व्यचरदिति, तदवलोकनेन मुनिपत्नयश्च संमोहिता इति, तेन च तत्रस्था महर्षयः प्राप्तकोपाः कुचेष्टितस्य यूनस्तस्य संतर्जनाय भयङ्करनादमाचरन्तं मृगम् अतिमहान्तमग्निं आभिचारिकैः प्रयोगैश्चोदपादयन्निति, तौ द्वावपि हेलयैव महादेवः कराभ्यामादाय विहरन्नासीदिति च किमप्यैतिहासिकं वृत्तम् । एवं प्रकारेण सद्भिः-ज्ञानिभिः । आमृश्यसे-निदिध्यासनादिभिरवलोक्यसे ।

(२) **कलशभवेति** । कलशभवमहर्षेः-अगस्त्यस्य, वातापिनिर्वापणे-वातापिनाम्नो दैत्यस्य स्वकुक्षौ जरणेन विनाशने ; कलशसंभवकृतेल्वलवातापिध्वंसनविषय इत्यर्थः । दक्षिणोर्व्याः-आर्यावर्तस्य दक्षिणभागस्थदेशस्य, भारापोहने दुष्टजननिरासने ; अनार्यभूयिष्ठस्य दक्षिणापथस्य दुष्टजनशिक्षणपूर्वकं शिष्टजनक्षेमनिर्वर्तनकर्मणीति तात्पर्यम् । विन्ध्यसंस्तम्भने-सूर्यगतिनिरोधमाचरितवतो विन्ध्यगिरेरभिवृद्धिनिरोधने । सिन्धुनाथस्य-सागरस्य, अम्बूनां-अपाम्, निश्शेषपाने च । शक्तिप्रदायि सामर्थ्योत्पादकम्, यत् स्वपादाम्बुजध्यानमाहात्म्यं-भवदीयपादारविन्दयोरुपासनोत्पन्नः प्रभावः यस्य सः, तत्सम्बुद्धिः । तव पादपद्मयोर्ध्यानस्य महिम्नैव महर्षिरगस्त्योऽपि तत्तादृशानामपदानानामपि नूनमभूत् पात्रमिति भावः । शम्भो । ते नमः-पुनः पुनश्च नमस्करोमि । (एतेषु दण्डकेषु निर्णयसागरमुद्रितपुस्तकरीत्या बहवः सापभ्रंशाः पाठभेदा दृश्यन्ते येषामिह दुश्शकं सूचनम् ।) शोधन-

प्रसूनशरदाहिने प्रबलकालकूटाशिने
कृतान्तपरिपन्थिने त्रिपुरगर्वनिर्वासिने ।
जटापटलयन्त्रितामरतरङ्गिणीस्रोतसे
प्रपन्नभयहारिणे प्रमथनाथ तुभ्यं नमः ॥ २२ ॥

विषये मया आदृतेऽपि सुमहत्युद्यमे नाहमेतेषां दण्डकानां शोधनेन तृप्तः । जनन-मरणेति दण्डकमपि प्रायः कविकृतमेव स्यात् , दण्डकानामपि चतुष्पादत्वात् ॥२१॥

पुनः पद्येन भक्त्युन्मेषहृद्येन भगवन्तं स्तौति **प्रसूनेति**। हे प्रमथनाथ-प्रमथि-गणाधिप परमेश्वर । दहतीति दाही, प्रसूनशरस्य-मन्मथस्य दाही, तस्मै ; दग्ध-मन्मथायेत्यर्थः । साक्षात् परमेश्वरस्याप्यात्मनो योगनिष्ठायाः सधार्ष्ट्यं प्रत्यूहस्या-चरितत्वात् , पुष्पवाणत्वमप्यनादृत्य विरूपाक्षः कामं तं निर्दयं ददाहेति भावः ।

"तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य ।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ॥
क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार"

इत्येतत्कथावर्णनमत्रानुसंधेयम् । प्रबलस्य-सकललोकदहनप्रवृत्तत्वादतिक्रूरस्य, कालकूटस्य-तदाख्यस्य महाविषस्य, अशिने-भक्षकाय । (दृश्यतां प्रथमाङ्के ४१ श्लोकः तद्व्याख्यानं च ।) कृतान्तस्य-यमस्य, परिपन्थिने-शत्रवे । (प्र. अङ्के. ४० पद्यं दृश्यताम् ।) त्रिपुरगर्वस्य त्रिपुरासुरदर्पस्य, निर्वासिने विनाशकाय । (प्र. अङ्क. ४२ पद्यं तद्व्याख्यानं च विलोक्यताम् ।) जटानां पटलेन-जटाजूटसमूहेन, यन्त्रितानि-इतस्ततश्चलितुमप्यशक्यतया सम्यङ्निरुद्धानि, अमरतरङ्गिण्याः-देव-गङ्गायाः स्रोतांसि-प्रवाहाः येन तस्मै । (दृश्यतामस्य अङ्कस्य १२ पद्यं तद्व्याख्यानं च ।) प्रपन्नस्य-शरणागतस्य, भयहारिणे-सकलापायनिवारकाय । (शरणागतानां स्वेन त्रातानां च मार्कण्डेयादीनां कथासन्दर्भोऽत्रानुसन्धेयः ।) एवं मदनदहनगरला-

निष्क्रियस्यापि देवस्य जगत्सृष्ट्यादिकर्मसु ।
प्रवृत्तिं कुर्वतीं देवीं प्रपद्ये भक्तवत्सलाम् ॥ २३ ॥

चमन-दण्डधरदण्डन-त्रिपुरहनन-गङ्गागर्वभञ्जन-प्रपन्नपालनादिभिः अपदानैः प्रथितप्रभावाय । तुभ्यं-परमेश्वराय भवते । नमः । प्रपन्नपरित्राणनशक्तस्त्वमिति भावः ।

"प्रशस्तगुणसिन्धवे प्रपदनस्पृशां बन्धवे
स्वतोऽपहतपाप्मने सकलदेहिनामात्मने ।
नमः कमलवासिनीनयनसौख्यसंदायिने
तमश्शमविधायिने तरणिमण्डलस्थायिने"

इति विश्वगुणादर्शे विद्यमानं विष्णुस्तवपरम् आरम्भपद्येष्वन्यतमं साधु पद्यमिदमनुकरोति शैल्या । दिष्टान्तावधिसमस्तसंकटस्यापि निकृन्तनेन निश्शेषमपि दौस्थ्यमपोह्य शरणागतस्य परित्राणने कृतपरिकरबन्धेन भवता भवत्पादसेवामाचरन् शरणमुपगतो जीवोऽहमपि रोगसमूहोपनतभयात् परित्रातव्य इति, श्रेयसां वितरणेन नितरामनुग्राह्य इति चाभ्यर्थयते राजा परमेश्वरमिति पद्यस्यास्य फलितो भावः ॥ २२ ॥

निष्क्रियस्येति । निष्क्रियस्यापि-स्वभावतः क्रियारहितस्यापि । देवस्य-भगवतः परब्रह्मणः; अत्र परमेश्वरस्येति तात्पर्यम् । जगतः-चराचरात्मकस्य भुवनस्य, सृष्ट्यादिषु सर्गस्थितिप्रलयाख्येषु, कर्मसु-व्यापारेषु । प्रवृत्तिं-उद्यमम् । कुर्वतीम्; जगतः सृष्ट्यादिकर्मसु प्रोत्साहमातन्वतीमिति भावः । अत एव भक्तवत्सलां-जननमरणादिक्लेशं चिरायानुभवत्सु भक्तजनेषु स्वयं वात्सल्यविशिष्टामिति भावः । देवीं-परमेश्वरीम् । प्रपद्ये-शरणमधिगच्छामि । निष्क्रियं-निर्गता क्रिया यस्येति ब्रह्म निर्दिश्यते । "निष्क्रियं निर्गुणं शान्तं निरपेक्षं निरञ्जनम्" इति ब्रह्मणः स्वरूपं सूत्रभाष्येऽस्ति निरूपितम् । "शान्तं शाश्वतमक्रियं यमपुनर्भावाय भूतेश्वरं द्वैतध्वान्तमपास्य यान्ति कृतिनः" इति कृष्णमिश्रोऽपि ब्रह्मणोऽक्रियत्वादिकम्

देवी—णाह, इमस्स मणोरहं पुच्छिअ झत्ति तं णिव्वत्तेहि । [नाथ, अस्य मनोरथं पृष्ट्वा झटिति तं निर्वर्तय ।]

परमेश्वरः—प्रिये, किमत्र प्रष्टव्यम् । विदितमेव यक्ष्मराजः कैश्चिदसाध्यरोगैः सहानुगतो विकुर्वाणो निर्मूलं छेत्तव्य इत्येतस्य मनोरथ इति । तत एतस्मै योगसिद्धिमुपदिश्य निर्जितनिखिलरोगं ब्रह्मरन्ध्रस्थितचन्द्रमण्डलनिष्यन्दमानामृताप्लुतशरीरं निजानन्दानुभवतुच्छीकृताखिलप्राकृतसुखान्तरं सफलमनोरथमेनं कृतार्थयिष्यामि ।

अभिधाय, "यस्माद्विश्वमुदेति यत्र रमते यस्मिन् पुनर्लीयते भासा यस्य जगद्विभाति" इति सृष्टि-स्थिति-संहाराद्यधिकाराश्च तस्यैवेति तेनैव पद्येन वर्णयति । कल्पान्ते करणकलेवरादिरहितान् अचेतनानिव विचेष्टमानान् जीवान् शक्तिरूपा देवी दृष्ट्वा वात्सल्येन कारुण्येन च सपदि तेषां करणग्रामोत्पादनपूर्वकमुत्तारणाय भगवन्तं स्वयमुत्तेजयतीति तत्त्वमनेन निर्दिष्टं भवति । "अचिदविशिष्टान् प्रलये जन्तूनवलोक्य जातनिर्वेदा । करणकलेबरयोगं वितरसि वृषशैलनाथकरुणे त्वम्" इति (श्रीवेङ्कटनाथस्य दयाशतकीयस्य) श्लोकस्य रहस्यमिह व्यज्यते ॥ २३ ॥

णाहेति । अस्य-जीवस्य । झटिति विलम्बं विनैव । निर्वर्तय-साधय ।

प्रिये किमिति । अत्र-जीवमनोरथविषये । कैश्चित् असाध्यरोगैः सह—पूर्वाङ्के (९७ पद्यस्यानन्तरम्) "कृतं शोकेन । सन्ति हि कतिपये केनापि दुरपनेयप्रवृत्तयो देवपादमूलोपजीविनः सैन्याः' इति वाक्येन सूचितैर्दुष्परिहार्यैर्व्याधिभिः साकमित्यर्थः । अनुगतः-रोगराडेष बहुभिर्बलवद्भिश्च व्याधिभिरनुसृतः सुबहुरोगपुरस्कृतश्चेति पूर्वमेव क्वचिन्निर्दिष्टरीत्या बलवत्सहायसंपन्नः । अत एव विकुर्वाणः-हृष्टमानसः; एतादृशबलसंपन्नं मां वराक एष विज्ञानशर्मा न कथं चिदपि जेतुं प्रभवेदिति दर्पदूषितचित्त इति भावः । "हर्षमाणो विकुर्वाणः" इत्यमरः । विपूर्वात् कृधातोः शानच । तस्मादेव मत्सरकृतकर्णजापः 'अव-

देवी—(सहर्षम्) सरिसं खु एदं तुम्हकेरस्स भत्तवच्छलस्स । [सदृशं खल्वेतद्युष्मादृशस्य भक्तवत्सलस्य ।]

परमेश्वरः—वत्स जीव, योगसिद्धिमुपदिशामि ते ।

राजा—भगवन्, को नाम योगः, कीदृशी वा तस्य सिद्धिः ।

न्ध्योऽयं प्रयत्नः । तदर्थमेव शत्रून्मूलनाय गच्छामः' इति पूर्वाङ्क्रान्ते यक्ष्मा हृष्टमना बभाषे । विकुर्वाण इत्यस्य अनुचराणाम् आमयान्तराणां साहाय्यबलेन शरीरस्य विकारमुत्पादयन्निति चान्योऽर्थः । तथा दृप्तस्य यक्ष्मणः सकुटुम्बमित्रस्य निरवशेषनिर्मूलनमेव जीवराजाभिलषितमिति विदितचरमेव ममेति पशुपतिः परमेश्वर्यैं विशदयति वियषम् । ततो हेतोः । एतस्मै-जीवराजाय । योगस्य-वक्ष्यमाणप्रकारस्य निदिध्यासनस्य, सिद्धि-सकलनिर्वहणप्रकारम् । ब्रह्मणः-परमात्मनः, रन्ध्रं-तदधिष्ठानभूतं बिलम्; यद्वा ब्रह्मप्राप्तये रन्ध्रम्; प्राणोत्क्रमणकाले योगिनां रन्ध्रेणानेन ब्रह्मसान्निध्यप्राप्तिर्भवतीति ब्रह्मरन्ध्रम् इति नाम; तत्र स्थितात् चन्द्रमण्डलात्, निष्यन्दमानेन योगबलेन प्रस्रवता, अमृतेन आप्लुतं-स्नापितम्, शरीरं यस्य तम्; सुषुम्नाकाण्डस्योर्ध्वं मूर्ध्नोऽन्तरा सहस्रदलपद्मवद्विद्यमानस्य कुण्डलिनीमण्डलाख्यस्य योगशास्त्रप्रसिद्धस्यावयवस्य मध्यभागो ब्रह्मरन्ध्रमिति व्यवह्रियते । तत्र चास्ति चन्द्रमाः स्वांशेन सन्निहित इति, निदिध्यासनाद्यभ्यासोपजनितसुधाधारानिष्यन्देन स चन्द्रमाः शरीरं योगिन आप्लावयतीति, तेन च स नीरोगो भूत्वान्ततो भगवत्सायुज्यमप्यधिगच्छतीति च योगशास्त्रव्यवहारः । तथा च

"ब्रह्मरन्ध्रसरसीरुहान्तरे नित्यलग्नमवदातमद्भुतम् ।
कुण्डलीविवरमण्डलाश्रितं द्वादशार्णसरसीरुहं भजे" इति

पादुकापञ्चकाख्ये योगग्रन्थे च, "तत्कर्णिकायां देवेशि ब्रह्मरन्ध्रे स्थितं महः । सूर्यस्य मण्डलं तत्र चन्द्रमण्डलमेव च । तत्सोममण्डलाद्वायुः सुधाधारां

परमेश्वरः—वत्स, श्रूयताम् । योगश्चित्तवृत्तिनिरोधः । चित्तं नामान्तः-करणम् । यच्चक्षुरादिकरणद्वारा बहिर्निर्गच्छद्विषयाकारेण परिणमति । यत्तादात्म्यापन्नो द्रष्टापि तद्रूपाकार एव परिभाव्यते । तदुक्तम्—

"ध्यायन्त्यां ध्यायतीवात्मा चलन्त्यां चलतीव च ।
बुद्धिस्थे ध्यानचलने कल्प्येते बुद्धिसाक्षिणि" इति ।

निषिञ्चति" इति कङ्कालमालिनीतन्त्रे च तत्तत्त्वविवरणं दृश्यते । "ब्रह्मद्वारं तदास्ये प्रविलसति सुधाधारगम्यप्रदेशं ग्रन्थिस्थानं तदेतद्वदनमिति सुषुम्नाख्य-नाड्यालपन्ति" इति षट्चक्रनिरूपणे, "मूलाधारस्थशिवशक्त्या परमशिव-शक्तिसामरस्येन निस्सरत्यमृतधारा" इति तद्व्याख्याने च विवृतो विषयश्च तत्त्व-मिदं पुनर्विशदयति । निजस्य-ब्रह्मरूपस्य स्वात्मनः, आनन्दानुभवः-आत्म-तत्त्वावबोधजनितपरमानन्दस्य स्वयमनुभवः, तेन तुच्छीकृतानि-अतीव लघूकृतानि-अखिलानि प्राकृतसुखान्तराणि-अशेषाणि चान्यानि लौकिकसौख्यानि येन तम् । स्वात्मानन्दानुभवजन्ये सुखे समुपनते लौकिकान्यशेषाण्यपि सुखानि सुतरां फल्गूनीति जीवः स्वयमेव निश्चेष्यतीति भावः । अत एव सफलमनोरथं-नीरोगतानिष्पादनेन त्रैवर्गिकसिद्धिः, आत्मतत्त्वावबोधनेन समुपनतश्चःश्रेयस-सिद्धिश्च यथेप्सितं युगपदधिगतेति समालोच्य सफलमनोरथत्वं तस्य भवेदिति भावः । वत्सेत्यादिभिः भक्तवत्सलः स्वयं जीवाय योगसिद्धिमुपदिशतीत्याह ।

वत्सेति । श्रूयतां योगः कीदृशः तत्सिद्धिश्च कीदृशीति विवृणोमि सावहिति आकर्ण्यताम् । योगो नाम चित्तवृत्तिनिरोधः ; इदं च पतञ्जलिभाषितम् । चित्तं नाम अन्तःकरणम् ; ज्ञानसाधनम् अन्तरिन्द्रियम् ; चित्ताख्यस्य अन्तरिन्द्रियस्य, वृत्तिः-बहिर्व्यापारेषु प्रवृत्तिः, तस्या निरोधः-विषयेभ्यः समाहरणम् ; तादृशं कर्मैव योगः । अन्तःकरणस्यैकाग्रतया ध्याने प्रवृत्तिरिति यावत् । तदेव पुनर्विवृणोति **यच्चक्षुरा-दीति** । यत्-चित्तम् । चक्षुरादिकरणद्वारा नेत्रश्रोत्रादिबाह्येन्द्रियमार्गेण । बहिः-शरीराद्बहिः । निर्गच्छत्-प्रवर्तमानं सत् । विषयाकारेण-शब्दस्पर्शरूपादिविषया-

"ध्यायतीव लीलयतीव" इति श्रुतिः। तस्य वृत्तयो नाम कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्याद्याः श्रुतीरिता आन्तराः; बाह्याश्च शब्दस्पर्शादिविषयग्राहिण्यः।

त्मना। परिणमति; बाह्येन्द्रियद्वारा विषयेषु मनसा सत्स्वनुभूयमानेषु तदन्तः-करणस्य विषयाणां च नैव भेदोऽवगन्तुं शक्यत इत्यभिप्रेत्य विषयविषयिणोरिहा-भेदाध्यवसायः कल्पितः। "मन एव मनुष्याणां कारणं बन्धमोक्षयोः। बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं तथा। विषयेभ्यः समाहृत्य विज्ञानात्मा मतो मुने। चिन्तयेन्मुक्तये तेन ब्रह्मभूयं परेश्वरम्" इति, "आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः। तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते" इति च वह्निपुराणादिषु योगस्य स्वरूपमाख्यातम्। एकान्ततो ब्रह्मणि मनसः स्थिरा प्रवृत्तिर्योगः। "अविचलितमनोभिः साधकैर्मृग्यमाणः" इति, "यास्वन्तःकरणस्य बाह्यकरण-व्यापाररोधीक्षणात्" इति च बाह्यविषयेभ्यश्चित्तवृत्तिनिरोधात्मकं निदिध्यासनकर्म भवभूतिनापि (माल. ९–१८) वर्णितमास्ते। यत्तादात्म्येति। यत्-येन हेतुना। तादात्म्यापन्नः-तादृशविषयात्मतां प्राप्तः। द्रष्टापि-अवलोकनकर्मकर्ता पुरुषश्च। तद्रूपं-तादृशविषयरूपम् आकारः-स्वरूपं यस्य सः। परिभाव्यते-विलोक्यते। न केवलं मनः, परं तु तदधिष्ठानभूतः पुरुषश्च विषयतादात्म्यमभिप्रपन्न इव विभाव्यत इति भावः।

तस्य प्रमाणं प्रतिपादयति ध्यायन्त्यामिति वचनेन। ध्यायन्त्यां-बुद्धौ ध्यानकर्माचरन्त्याम्। आत्मा-जीवात्मा। ध्यायतीव-अन्तः निश्चलतया ध्यानकर्म स्वयमाचरतीवास्ते। चलन्त्यां-ध्यानान्निवृत्य बाह्यविषयेषु प्रवृत्तायां सत्याम्। चलतीव-आत्मापि बहिर्विषयेषु धावन् गच्छतीव च परिभाव्यते। अतो हेतोः बुद्धिस्थे-चैतन्याधारभूतबुद्धीन्द्रियमाश्रित्य विद्यमाने। ध्यानचलने निदिध्या-सनविषयानुधावनात्मके द्वे कर्मणी। बुद्धिसाक्षिणि-जीवात्मरूपे पुरुषे। कल्प्येते-आरोप्येते। इदं च वचनं श्रुतिमूलकमेवेति निरूपयति ध्यायतीवेति।

सत्त्वरजस्तमोरूपगुणत्रयात्मिकानां च तासां दैवासुरसम्पद्रूपत्वेन द्वेधा विभाग उक्तो गीतायाम्। "अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।

ध्यायतीव लोलयतीवेति द्वितयमपीदं कर्म आत्मकर्तृकम्। तस्य-अन्तः-करणस्य बुद्धीन्द्रियस्य वा। आन्तरा वृत्तयो नाम। कामः-इच्छा। सङ्कल्पः-मनोव्यापारः, इतिकर्तव्यतानिश्चयो वा। विचिकित्सा-संशयः। श्रद्धा-धर्मकार्येषु संप्रत्ययः; शुभेषु कार्येषु सादरा प्रवृत्तिरिति भावः; "प्रत्ययो धर्मकार्येषु महान् श्रद्धेत्युदाहृता" इति स्मृतिः। अश्रद्धा-अनादरः। धृतिः-धैर्यम्। ह्रीः-लज्जा। इत्याद्याः-आदिशब्देन क्रोधेर्ष्यादयश्च गृह्यन्ते। श्रुतीरिताः-लोलयतीवेत्यादिभिः वेदेषु प्रतिपादिताः। बाह्याश्च तस्य बुद्धीन्द्रियस्य वृत्तयः। शब्दस्पर्शरूपरसगन्धाख्यान् विषयान् गृह्णन्तीति विषयग्राहिण्यः। शब्दस्पर्श रूपादयो ये विषया बहिरिन्द्रियाणां श्रोत्रत्वक्चक्षुरादीनां गोचरास्ते बाह्या वृत्तय इत्यर्थः। "एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश। प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन् विशुद्धे विभवत्येष आत्मा" इति मुण्डकोपनिषदो वचनमनुसृत्य जीवात्म-प्राण-चित्तानां सन्निपतितानि लक्षण-कर्मादीनि कविनात्र संगृहीतानीति ज्ञातव्यम्।

जीवराजाय परमेश्वरो योगसिद्धिप्रकारं समुपदिशन्, तासां चित्त-वृत्तीनां भगवद्गीताभिहितं द्वैविध्यं गुणभेदेन विशदयति **सत्त्वेति**। सत्त्व-रजस्तमसां रूपं यस्य तत्; गुणानां त्रयं गुणत्रयम्; सत्त्वरजस्तमोरूपं च तत् गुणत्रयं च सत्त्वरजस्तमोरूपगुणत्रयम्; तदात्मिकानां-तत्स्वरूपाणाम्। तासां-चित्तवृत्तीनाम्। देवानामियं दैवी, असुराणामियम् आसुरी; तयोः संपत्; तद्रूपस्य भावः; दैवासुरसम्पदोः रूपत्वेन; दैवसम्पत् आसुरसम्पत् इत्या-कारत्वेन। **अभयमिति**। अभयं-भयराहित्यम्; आश्रितानां भयात् त्राणनमित्यर्थः। सत्त्वसंशुद्धिः-मनश्शुद्धिः; सत्त्वाधिष्ठानस्यान्तःकरणस्य सर्वदोषनिवृत्तिरिहाभि-प्रेता। ज्ञानयोगव्यवस्थितिः-प्रकृतिवियुक्तात्मस्वरूपविवेकनिष्ठा। दानं-धनादिकस्य

दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्" इत्यादिर्दैवी संपत्। "दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च" इत्यादिरासुरी संपत्। तत्र दैवी संपत् सात्त्विकी। आसुरी तु रजस्तमःप्रधाना। "दैवी संपद्विमोक्षाय निबन्धायासुरी मता।" तासां सर्वासामान्तरीणां बाह्यानां च चित्तवृत्तीनां

पात्रे प्रतिपादनम्। दमः-मनसो विषयेभ्यो निवर्तनम्। यज्ञः-ब्रह्मयज्ञादिः। स्वाध्यायः-वेदशास्त्राद्यभ्यासनिष्ठा। तपः-कृच्छ्रचान्द्रायणादिव्रतानुष्ठानम्। आर्जवं-मनोवाक्कायवृत्तीनामेकनिष्ठता परेषु। इत्यादिः-आदिशब्देन "अहिंसा सत्यमक्रोधस्त्यागश्शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्। तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता" इत्येतेऽप्यवशिष्टा गीतानिर्दिष्टा गुणा गृह्यन्ते। एतद्गुणानां समृद्धिः या सा दैवी-देवसम्बन्धिनी। संपत् इति व्यवह्रियत इति भावः। दम्भ इति। दम्भः-स्वात्मनो गुणाभासस्य महिमाभासस्य वा ख्यापनोद्देशेन क्रियमाणं कर्म अभिधीयमानं वचनं वा। दर्पः-विद्याधनादिनिमित्त उत्सेकः। अतिमानः-आत्मनः पूज्यतातिशयभावना। क्रोधः-कोपः। पारुष्यं-परेषामुद्वेगावहरूपो गुणः। इत्यादिः-अत्र चादिशब्देन अज्ञानं चोक्तावशिष्टं गृह्यते। "अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्" इति च गीतावचनम्। एतेषां सद्गर्हितानां दुर्गुणाणां समृद्धिः। आसुरी-असुरसम्बन्धिनी। सम्पत् भवति। तत्र दैवीति। तत्र तयोर्दैवासुरसम्पदोः मध्ये, दैवी सम्पत् सात्त्विकी-सत्त्वगुणप्रचुरा सद्भिराद्रियमाणा च। आसुरी तु सम्पत् रजःप्रधाना तमःप्रधाना च; अतः सद्भिर्गर्ह्यमाणा। अनयोः सदसदात्मिकयोः सम्पदोर्गीतोक्तं फलमाह दैवीति। दैवी सम्पत् या, सा विमोक्षाय-रोगेभ्यः संसारबन्धनाच्च विशिष्य मुक्तये भवति। आसुरी सम्पत्तु। निबन्धाय-रोगैः संसृत्या च नियतबन्धनाय। मता अभिप्रेता। योगस्वरूपं निगमयति तासामिति। आन्तरीणां बाह्यानां च सर्वासां तासां-पूर्वनिर्दिष्टानाम्। चित्तवृत्तीनां-दैवीनामासुरीणां चान्तःकरणप्रवृत्तीनाम्। निरोधो नाम-निरोधप्रकारः कीदृश इति पृष्टे।

निरोधो नाम स्वस्वविषयेभ्यः प्रतिनिवर्त्य क्वचित् सगुणे निर्गुणे वा वस्तुनि चित्तस्य समवस्थापनम् ।

तच्च दृढतरवैराग्यसत्कारनिरन्तरसेवाभ्यासबलेन लभ्यते । तदुक्तम् —

" असंशयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय

स्वस्वविषयेभ्यः-तत्तदुचितेभ्यः इन्द्रियार्थेभ्यः । प्रतिनिवर्त्य-मनः समाकृष्य । सगुणे-ज्ञानशक्तिसौन्दार्यादिकल्याणगुणयुक्ते । निर्गुणे वा-हेयगुणरहिते वा । क्वचित् वस्तुनि-यस्मिन् कस्मिंश्चन शुभाश्रयभूते शिवतत्त्वरूपे विष्णुतत्त्वरूपे वा परब्रह्मणि । चित्तस्य-पूर्वोक्तलक्षणस्य अन्तःकरणस्य । समवस्थापनं-एकाग्रतया सम्यङ्निवेशनम् ; निदिध्यासननिर्वहणमिति यावत् ।

तच्चेति । तच्च चित्तस्य शुभाश्रयवस्तुनि समवस्थापनं च । दृढतरेण-सुतरां निश्चलेन, वैराग्यस्य-दृष्टादृष्टेषु भोगेषु दोषदर्शनाभ्यासजाततृष्णाराहित्यस्य, सत्कारार्थं सभक्त्युन्मेषेण पूजनार्थम्, निरन्तरसेवाभ्यासस्य च बलेन; उत्कटवैराग्यस्य पूजापुरस्सरभगवत्सेवायाश्च अनुवृत्तिप्राबल्येनेति भावः । लभ्यते-तादृशचित्तवृत्तेर्ब्रह्मणि स्थापनम् उपलभ्यते । (निरन्तरसेवनाभ्यासबलेन लभ्यते इति पाठस्तु न साधुः ।) तस्य प्रमाणमवतारयति तदुक्तमित्यनेन । **असंशयमिति** गीतावचनम् । महाबाहो हे पराक्रमशालिन् अर्जुन । मनः मानवानामन्तःकरणम् । चलं-अतितरलस्वभावम् । अत एव दुर्निग्रहं तस्य विषयप्रवृत्तेर्निग्रहो न सुखसाध्य इत्यर्थः । मनो दुर्निग्रहं चलमित्येतत् असंशयम् नास्त्यत्र किञ्चिदपि संशयस्थानमिति भावः । तु-किन्तु; न तत् सर्वथा भवत्यसाध्यमिति सूचयति तुशब्दः । कौन्तेय-अर्जुन । अभ्यासेन-आत्मनि आभिमुख्यकरणात्मकेन महतोद्यमेन । वैराग्येण-आत्मव्यतिरिक्तेषु भावेषु सर्वेष्वपि दोषाकरत्वदर्शनजनितवैतृष्ण्येन च । गृह्यते-कथंचिन्निगृह्यते । इति एवं भगवतोक्तमित्यर्थः । अत एवानन्तरमपि " असंयतात्मना योगो दुष्प्राप इति

वैराग्येण च गृह्यते" इति। एतादृशयोगस्य सिद्धिर्नाम ध्येयवस्तु-साक्षात्काररूपावस्थितिः।

मन्त्री—भगवन्,

एवंभूताः क इव घटते चित्तवृत्तीर्निरोद्धुं
वैराग्येणाभ्यसनविधिना स्याच्चिरात्तन्निरोधः।
जेयः शीघ्रं रिपुरपरधा न स्थितिर्नः पुरेऽतो
योगे सिद्धिर्भवति च यथानुग्रहस्ते तथास्तु ॥ २४ ॥

मे मतिः" इति विषयेभ्यो मनोनियमनं विना योगो न सिद्ध्यतीति गीतायां भगवान् स्वयमाचचक्षे। 'को नाम योगः' इत्येतत् साधु समाधाय, 'कीदृशी तस्य सिद्धिः' इति जीवकृतप्रश्नं च समाधत्ते **एतादृशेति**। एतादृश-योगस्य-निर्दिष्टपूर्वलक्षणयुक्तस्य समाधेः। सिद्धिर्नाम कीदृशीति पृष्टे तत् समाधत्ते। ध्येयं-ध्यानयोग्यम्, यत् वस्तु-शुभाश्रयब्रह्मरूपं तत्त्वम्, तस्य साक्षात्काररूपा-प्रत्यक्षीकरणात्मिका, अवस्थितिः-भगवत्साक्षात्कारफलप्रदाव्यवस्थानं। एवं भक्त-वत्सलो भगवान् भवो योगस्वरूपम्, तत्सिद्धिप्रकारं च सुव्यक्तं जीवस्योज्जीवना योपदिदेश।

शिवोपदिष्टयोगसाधनस्य दुस्साधतां मन्त्री महेश्वरायं निवेद्य, शत्रु-निरसनायोपायान्तरस्योपदेशमभ्यर्थयते **एवंभूता इति**। भगवन्-परमेश्वर। एवं-भूताः-पूर्वनिर्दिष्टरूपाः काम-सङ्कल्प-विचिकित्सा-दम्भ-दर्पादिरूपेणाजानसिद्धाः। चित्तवृत्तीः-मनसो दुर्निग्रहान् गतिविशेषान्। निरोद्धुम्-बलान्नियन्तुम्। क इव घटते-को नाम प्रभवति। नैष योगः संप्रति सुलभोऽस्माकम्। अत एव खलु—

"अपि च प्रभूतमदमेदुरात्मनो विषयाटवीषु विविधासु धावतः।
स्वबलेन हन्त मनसो निवर्तनं बिसतन्तुनेव सुरदन्तियन्त्रणम्"

राजा—भगवन्,

स्मृतिस्ते सकलाभीष्टं दत्ते किमुत दर्शनम् ।
तत् प्राप्तममितैः पुण्यैः सद्यः सिद्धिं ददातु मे ॥ २९ ॥

इति श्रीकवितार्किकसिंहश्च चित्तवृत्तिनिरोधस्य सुदुष्करत्वं निरूपितवान् । (एवं भूत इति क इत्यस्य विशेषणत्वेन पाठान्तरमप्यस्ति ।) तन्निरोधः-तस्य मनसो विषयप्रवृत्तिभ्यो विनिवर्तनपूर्वकं ध्याने नियमनम् । वैराग्येण । अभ्यसन-विधिना-विषयेभ्यो मनो निवर्त्य समाधिनिर्वर्तनाभ्यासकर्मणा च । चिरात्-अतिदीर्घेण कालेन । स्यात्-योगसिद्धिः संभवेत् । किन्तु समुपनतं नः सङ्कटं न तादृश विलम्बक्षममिति निवेदयति **जेय इति** । रिपुः-अस्मच्छत्रुर्यक्ष्मा । शीघ्रं जेयः-विनैव विलम्बं जेतव्यो भवति । अपरधा-तथा त्वरितमेव न चेत् स जीयत इत्यर्थः । नः जीवराजसम्बन्धिनामस्माकम् । पुरे-देहाख्ये नगरे । स्थितिः न-अत्र नास्माकं स्थितिर्भविष्यति । शरीराद्वयं निष्कासिता भवेमेति यावत् । अतो हेतोः । योगे यथा सिद्धिर्भवति-अचिरादेव यथा योगसिद्धिः संभवेत् । तथा ते-भवतः । अनुग्रहश्च अस्तु-अद्यैव यथानितरसुलभस्य भवद्दर्शनस्य दानेन वयमनुगृहीतास्तथा योगसिद्धिप्रदानेनापि अद्यैव वयमनुग्राह्याः, नो चेत् दुर्जयैरतितीव्रप्रवृत्तिमद्भिररिभिः पुरमिदमभिहन्येत, वयमपि निराधारत्वात् त्रिवर्गस्यापवर्गस्य वा साधने हतोद्यमा भवेमेति भावः । (सिद्धिर्लघु च भवि-तानुग्रह इति च पाठः ।) ॥ २४ ॥

योगसिद्धिप्राप्तेर्दुर्घटत्वमवगत्य स्वयमेव परमेश्वरं तत्फलावाप्त्यनुग्रहाय प्रार्थयते **स्मृतिरिति** । हे भगवन्-परमेश्वर । ते-तव । स्मृतिः-स्मरणमपि । सकलाभीष्टं-सकलमपि मनोरथम् । दत्ते । दर्शनं-तव प्रत्यक्षीकरणम् । किमुत-मदभीप्सितं सर्वथा प्रयच्छेद्भवद्दर्शनमित्यत्र कः सन्देह इत्यर्थः । अमितैः-अपरिच्छेद्यप्रमाणैः । पुण्यैः । प्राप्तं-मयाधिगतम् । तत्-तादृशं भवद्दर्शनमेव । मे-भवदनुग्रहपात्रस्य मम । सिद्धिं-योगसिद्धिम् । सद्यः-अद्यैवेत्यर्थः । ददातु ।

देवी—(सदयम्) देव, संकप्पादो जेव्व से जोअसिद्धी होदुत्ति अणुगेह्णीअदु एसो । [देव, सङ्कल्पादेवास्य योगसिद्धिर्भवत्वित्यनुगृह्यतामेषः ।]

परमेश्वरः—वत्स, देव्यैवानुगृहीतोऽसि । सङ्कल्पादेव तेऽखिलयोगसिद्धिर्भवतु ।

मन्त्री—राजन्, भगवत्या भगवता च सङ्कल्पादेवाखिलयोगसिद्धिरनुगृहीता । तत् सर्वथा कृतार्थाः स्मः ।

"निर्जितनिखिलविपक्षं नीरुजपुरसुस्थमपहतातङ्कम् । अहमागत्य विधास्ये परमानन्दाब्धिमाप्तकामं त्वाम्" इति चतुर्थाङ्केऽभिहितरीत्या समभिवृद्धस्वविषयकभक्तिप्रभावसंधुक्षितः परमेश्वरः स्वयमेव जीवस्य पुरस्तात् तदनुग्रहायाविर्भूत इत्यवधार्य, सर्वधात्मानं विजयिनं सिद्धसकलमनोरथान्तरं च स एव साम्प्रतमेव विदधात्विति प्राप्तावकाशेन प्रार्थ्यते जीवेन ॥ २९ ॥

सदयमिति । देवी-परमेश्वरी स्वयं दयारूपिणी । "प्रवहन्ती तु दया तव परिहृतनीचोच्चवस्तुवैषम्या" इति पूर्वोक्तरीत्या (४—२२) निरुपाधिकवत्सलाया ईश्वर्याः दयनीये जीवे तत्प्रपदनानन्तरमेव नीचोच्चवैषम्यरहितः स्वयमनुग्रहः समुत्पन्न इति सूचयतीदं सदयमिति पदम् । सङ्कल्पादेवआशासनपूर्वकं मानसिकोद्देशादेव । "सङ्कल्पो मानसं कर्म" इत्यमरः । "सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः । व्रता नियमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः" इति योगव्रतादीनां सिद्धिः सङ्कल्पादेव संभवतीति एकादशीतत्त्वादयो ग्रन्थाः । वत्सेति । देव्यैव-परमेश्वर्यैव । मदेव्या अनुग्रहे त्वयि प्रवृत्ते नाहमन्यथा कर्तुं प्रभवामीति सूचयत्येवकारः । (देव्यैवमनुगृहीतोऽसि इति पाठान्तरम् ।) अखिलयोगसिद्धिः-योगस्य यथावन्निर्वर्तितस्य या या सिद्धिः-फलम् लोके समुद्भवति सा सर्वापि निश्शेषतया ते देव्या अनुग्रहबलादपि भव-

राजा—(सप्रणामम्) अनुगृहीता एव वयम्। यतः—

या प्रत्यक्षपदार्थमात्रविषया सा योगसंस्कारतः
संस्कारान् प्रतिबध्नतीतरकृतान् धीः कापि मे जृम्भते।
सूक्ष्मं यत्तु विदूरमव्यवहितं सर्वान् विशेषान् स्फुटं
पश्याम्येष यथावदद्य परमार्थोद्भूतया प्रज्ञया ॥ २६ ॥

त्विल्यर्थः। (अखिलेति पदं क्वचित्पुस्तके नास्ति।) **अनुगृहीता इति**। वयम् अनुगृहीता एव-पार्वतीपरमेश्वराभ्यां वयं सर्वथापि संप्रत्यनुगृहीता इति सम्यगवगम्यत इति निरूपयति यत इत्यनेन। (अनुगृहीतैवेयम् इति पाठे-इयं-मे बुद्धिः। अनुगृहीता च भवतीत्यर्थः। स तु न समीचीनः पाठः।)

या प्रत्यक्षेति। यतः कापि धीरपूर्वा मे जृम्भते, यतश्च परमार्थप्रज्ञया विस्पष्टं विश्वं पश्यामि, अतो वयमनुगृहीता एवेति पूर्ववाक्येन संबन्धः। या-मे धीः; धीशब्देन स्वपत्नी बुद्धिर्गृह्यते। प्रत्यक्षपदार्थाः-चक्षुःश्रोत्रादि-पञ्चेन्द्रियगोचराणि वस्तूनि, तन्मात्रं विषया यस्याः सा; कालेनैतावता च स्थूलानां पाञ्चभौतिकानां द्रव्याणाम् अवगमशक्तिमात्रविशिष्टा बुद्धिरासीदिति भावः। अद्य तु सा धीः। योगसंस्कारतः-निदिध्यासनादिजनितपरिष्क्रियाविशेषेण। इतरकृतान्-प्रमाणान्तरसाधितान्। संस्कारान्-परिचयान्। प्रतिबध्नती रुन्धती। "तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी" इति पातञ्जलसूत्रम्। कापि-वाग्विभवातिवृत्तप्रभावा। मे-मम। जृम्भते-समेधते। योगसंस्कारोपपन्नं दिव्यज्ञान-स्वरूपमेवाह **सूक्ष्ममिति**। अद्य-भवदनुग्रहप्राप्त्यनन्तरमेव संप्रति। परमार्थो-द्भूतया-तत्त्वतः समुत्पन्नया। प्रज्ञया-असाधारणदिव्यज्ञानेन। यत् सूक्ष्मं वस्तु तदपि। विदूरं—विशिष्य दवीयसि स्थितमपि; यद्वा विदूरं यथा तथा-अतिसमीपे स्थितवदेवेत्यर्थः। तथा अव्यवहितं-पदार्थान्तरानाच्छादितं यथा तथा च। स्फुटं-अति स्पष्टं यथा तथा च। सर्वान् विशेषान्-तत्सूक्ष्मवस्तुनि

आश्चर्योऽयं भगवत्प्रसादमहिमा ।

परमेश्वरः—देवि, एवं संप्रज्ञातसमाधिरेतस्य प्रादुर्भूतः ; यत एवं सालम्बनामनुभवति ऋतंभरां नाम प्रज्ञाम् । अतःपरं निर्बीजयोगसंज्ञं संप्रज्ञातसमाधिमस्यानुगृह्णामि ।

देवी—अणुगेह्णीअदु अत्तमणिव्विसेसो एसो । [अनुगृह्यतामात्मनिर्विशेष एषः ।]

राजा—(सहर्षोल्लासरोमाञ्चम्) आश्चर्यमाश्चर्यम् ।

संनिविष्टान् अवयवादिभेदानपि । एषः-जीवोऽहम् । यथावत् पश्यामि-भ्रान्तिहीनेन परमनिर्मलेन ज्ञानेन वस्तुतत्त्वं संप्रति सम्यक् प्रत्यक्षीकरोमीत्यर्थः ॥२६॥

आश्चर्य इति । अयं-भगवत्प्रसादमहिमा-परमेश्वरस्यानुग्रहेण समुत्पन्नः प्रभाव एषः । आश्चर्यः-अनुपदमेव परमार्थज्ञानस्य समुत्पादितत्वात् नूनमद्भुतावहः । **देवीति** । एतस्य-जीवस्य । एवं-या प्रत्यक्षेति पद्योक्तप्रकारेण । संप्रज्ञातसमाधिः-समस्तसूक्ष्मविषयाणाम् अतिदवीयसां च विषयाणाम् अन्वक्षीकरणरूपा ज्ञाननिष्ठा । प्रादुर्भूतः-जातः । यतो हेतोः । एवं-पूर्वोक्तप्रकारेण । सालम्बनां संघटितपराग्वृत्तित्वचिन्तनात्मकाम् । ऋतंभरां नाम प्रज्ञां-तदाख्यं योगजन्यं सत्यज्ञानम् ; ऋतं नाम सत्यम्, तत् भरति-बिभर्तीति ऋतंभरा । 'ऋतंभरा तत्र प्रज्ञा' इति च पतञ्जलिः । "ऋतंभरादयश्च देव्यः" इति प्रबोधचन्द्रोदयेऽपि यदुक्तं तत् जीवस्याद्वैतज्ञानोदयाय ऋतंभरादिप्रज्ञाबलसाहाय्यमेव प्रधानमभूदिति ज्ञापयति । अनुभवति-ऋतंभराप्रास्युत्पन्नसत्यज्ञानजन्यमानन्दमनुभवति । (य एवमालम्बनामनुभवति ऋतंभरामिति पाठो न सम्यक् ।) अतःपरं-ऋतंभराज्ञानोत्पत्त्यनन्तरम् । निर्बीजयोगसंज्ञं-विघटिताशेषपराग्वृत्तित्वचिन्तनात्मकम् । असंप्रज्ञातसमाधि-प्रत्यगात्मैक्यानुभवानुसंधानम् । **अणुगेह्णीअदु इति** । एषः-जीवः । आत्मनिर्विशेषः-आत्मनः-परमेश्वराद्भवतः, निर्विशेषः-अनुग्रहैकपात्रीभूतत्वात् ब्रह्मैक्यज्ञानस्याद्य समुद्भूतत्वाच्चात्मनिर्विशेष इति समुचितमुक्तम् । **सहर्षेति** ।

भगवन् करुणासमित्समिद्धे दृढनिर्बीजसमाधियोगवह्नौ ।
प्रविलापितसर्वचित्तवृत्तिः परमानन्दघनोऽस्मि नित्यतृप्तः ॥ २७ ॥

परमेश्वरः—देवि, झटिति विघटिताखिलपराग्वृत्तिः प्रत्यगात्मैक्यानुभवरूपोऽसंप्रज्ञातसमाधिराविर्भूतो वत्सस्य । यत एवमनुभूतमर्थमनुवदति ।

आत्मज्ञानस्य ब्रह्मानन्दसहचरितस्य प्रादुर्भूतत्वात् हर्षोल्लासरोमाञ्चाश्चर्याणामप्यनुपदमेवानुभवः सूचितः ।

ब्रह्मानन्दानुभवप्रकारमेव वर्णयति **भगवन्निति** । भगवन्-परमेश्वर । करुणा-भवद्दयैव, समिधः-इन्धनानि, ताभिः समिद्धे-उद्दीपिते । दृढः-अप्रकम्प्यः, निर्बीजसमाधिरूपः-असंप्रज्ञातसमाध्यात्मको योग एव वह्निः-त्रेताग्निः तस्मिन् । प्रविलापिताः-हुताः, लयं गमिता इत्यर्थः, सर्वाः चित्तवृत्तयः-अन्तःकरणप्रवृत्तयः येन सः । अहमिति शेषः । नित्यतृप्तः-नैरन्तर्येण सन्तुष्टः । परमानन्दघनः-केवलानन्दमयोऽस्मि । स्वान्ते विधूतसमस्तबाह्यवृत्तिप्रसरे सर्वात्मना शान्तिमधिगते ज्ञानानन्दमयत्वं जीवस्य जीवन्मुक्तिदशायां यदाविर्भवति तदेवानितरसाधारणमवस्थान्तरमत्र सूचितं भवति । अनेन प्रत्यग्ब्रह्मणोरैक्यलक्षणा फलप्राप्तिरभिहिता भवति ॥ २७ ॥

झटितीति । झटिति-मदनुग्रहोत्तरक्षण एव । विशेषेण घटिता-निर्वर्तिता, अखिलपराग्वृत्तिः-परमात्माभिमुखसमस्तोद्यमः यस्य सः; यद्वा निवृत्ताशेषलौकिकविषयप्रवृत्तिः । तथा प्रत्यगात्मनोः-जीवात्मपरमात्मनोः, ऐक्यानुभवरूपः-तादात्म्यतानुसन्धानात्मकः । असंप्रज्ञातसमाधिः-निर्बीजसमाधिः । वत्सस्य-अस्मद्वात्सल्यभाजनस्यास्य जीवस्य । आविर्भूतः-जीवन्मुक्तदशाविशेषोऽधिगत इति यावत् । अनुभूतमर्थं-ब्रह्मानन्दानुभवाख्यं निःश्रेयसम् ।

देवी—देव, किदत्थो खु एसो जो एवंविधस्स देवाणुग्गहस्स भाअणं जादो । [देव, कृतार्थः खल्वेष य एवंविधस्य देवानुग्रहस्य भाजनं जातः ।]

परमेश्वरः—संप्रत्येनं व्युत्थाप्य प्रकृतकार्यप्रवणं करोमि । (जीवं प्रति) वत्स, अन्यदपि किञ्चिदनुशासनीयोऽसि ।

राजा—(व्युत्थाय) भगवन्, अवहितोऽस्मि ।

परमेश्वरः—

प्राचीनः सचिवः प्रियस्तव सुहृद्यो ज्ञानशर्मा मुनि-
स्तोमस्यापि सुदुर्लभः स भवता मान्यः सदाहं यथा ।
श्रेयस्संघटनाय हन्त भवतः सत्यं स एवार्हति
प्रेयस्त्वैहिकमातनोतु सततं विज्ञानशर्मापि ते ॥२८॥

देवेति । देवानुग्रहस्य-भवदीयप्रसादस्य । यो भाजनं जातः-पात्रीभूतः । स एष जीवः कृतार्थः-सफलमनोरथः संवृत्तः । **संप्रतीति** । एनं-जीवम् । व्युत्थाप्य-समाधिसंस्थातः प्रतिबोध्य । प्रकृतकार्ये-संप्रति साधनीये कर्मण्यैहिके, प्रवणं व्यग्रचित्तम् । अन्यदपि किञ्चित्-आध्यात्मिकधर्मानुष्ठानादपरमपि किमपि धर्मकर्म । तद्विषय इति यावत् । अनुशासनीयोऽसि-बोधितव्योऽसि । **भगवन्निति** । अवहितोऽस्मि-भवदुपदिश्यमाने विषये दत्तावधानो भवामि ।

ऐहिकामुष्मिकश्रेयस्करं तमेव विषयं परमेश्वरः प्रस्तौति **प्राचीन इति** । तव प्राचीनः सचिवः-विज्ञानशर्मणोऽपि पूर्वं साहाय्यमाचरन् समीचीनोऽमात्यः । प्रियः सुहृत्; न केवलं मन्त्र्यन्तरवत् राज्यकार्यनिर्वर्तनार्थमेव नियमितोऽधिकारी परं तु परमं ते मित्रं त्वदीयाशेषश्रेयोऽभिलाषी चेति भावः । यो ज्ञानशर्मा विद्यते सः । मुनिस्तोमस्यापि-महर्षिसमुदायस्यापि । सुदुर्लभः-तस्य

शश्वद्ज्ञानादभिन्नः सन् विज्ञानमपि मानय ।
एवं सति घटेयातां मुक्तिमुक्ती करे तव ॥ २९ ॥

राज-मन्त्रिणौ—(साष्टाङ्गं प्रणम्योत्थाय) अनुगृहीतौ स्वः ।

साहाय्यं महर्षिकुलस्यापि सुतरां दुरवापमित्यर्थः । (मुनिः सोऽन्यस्यापि सुदुर्लभ इति पाठे—मुनिसदृशः स ज्ञानशर्मा नृपान्तरस्य सुतरां दुर्लभो मन्त्रीत्यर्थः ।) अत एव अहं यथा भवता स च मान्यः-यथा भक्तिविस्रम्भपूर्वकं मां मानयसि तथा सोऽपि त्वया संभावनीयः । महान् स मन्त्री मध्ये काले सुदूरं विस्मृतकल्पोऽपि तमिममितःपरं वा साधु संभाव्य तत्साहाय्यमधिगच्छेत्युपदिशति । इतः किमेष मे करिष्यतीति प्रश्ने सति तत्राह श्रेय इति । हन्तेति स्वहर्षं सूचयति । स एव-नान्य इति भावः । भवतः श्रेयस्संघटनायनिःश्रेयसरूपामुष्मिकार्थसंपादनाय । सत्यं अर्हति-विनैव संशयं स एव तव निःश्रेयससाधनायोपयोगी भविष्यति । तु-किंतु । विज्ञानशर्मापि । ते-तव । ऐहिकं प्रेयः-एहिकश्रेयस्करं कर्म । सततं-यावज्जीवम् । आतनोतु-इह लोके स्वबुद्धिबलेन कुर्वन्नस्तु । ज्ञानविज्ञानयोः विषये समदृष्टिर्भवेति भावः ॥ २८ ॥

ज्ञानविज्ञानयोः संभावनाया आवश्यकतां दृढयति **शश्वदिति** । ज्ञानात्-ज्ञानशर्माख्यमन्त्रिणः । अभिन्नः सन्-तत्संबन्धादनपगच्छन्नेव सन् । शश्वत्-आवश्यकेषु तेषु-तेषु समयेषु । विज्ञानमपि-विज्ञानशर्माणमपि । मानय-मन्त्रालोचनादिविधानेन तदनुसरणपूर्वकं पुरस्कुरु । एवं सति-उभयोरप्यनयोर्यथोचितं संमानने कृते । भुक्तिमुक्ती-ऐहिकं सुखम् आमुष्मिकं मोक्षरूपं महच्छ्रेयश्च । तव करे घटेयातां-तव हस्तगते स्याताम् । उभावप्येतौ तव त्रैवर्गिकम् आपवर्गिकं च श्रेयस्संपादनक्षमाविति भावः । एवमाश्चर्यकराणां भगवदनुग्रहोपात्तपरमश्रेयसां प्रतीतेः उपगूहनं नाम निर्वहणसन्ध्यङ्गमुक्तम् ॥ २९ ॥

देवी—सुमरणमेत्तसंणिहिदं णाणसंमाणं सइवं विण्णाणेण समं मुत्तविरोहं करिअ दुवे वि मंतिणो रण्णो हत्थे समप्पअंतेण भअवदा बहुलीकिदं भत्तवच्छलत्तणम्। [स्मरणमात्रसंनिहितं ज्ञानशर्माणं सचिवं विज्ञानेन समं मुक्तविरोधं कृत्वा द्वावपि मन्त्रिणौ राज्ञो हस्ते समर्पयता भगवता बहुलीकृतं भक्तवत्सलत्वम्।]

(नेपथ्ये)

जीवे शिवप्रापितयोगसिद्धौ कल्ये जनान्ध्येन समं तमोवत्।
पापो विषूच्या सह राजयक्ष्मा गदैरसाध्यैः सह नाशमेति ॥ ३० ॥

सुमरणेति। स्मरणमात्रसंनिहितं-परमेश्वरकृतस्मृत्यनन्तरक्षणोपस्थितम्। ज्ञानशर्माणं-नाम सचिवं विज्ञानेन समं मुक्तविरोधं कृत्वा-परस्परवैषम्यममपहाय यथा जीवराजस्य हिते निरुपरोधं सानुकूलं च द्वावपि कार्याणि कुर्वातां तथा विधाय। भक्तवत्सलत्वं बहुलीकृतं-भक्ते जीवे विद्यमानः प्रेमातिशयः सुतरामुपचितः। "विज्ञानमन्त्रिमन्त्रैर्विविधैरसकृद्विधूतनिजशक्तिः। स ज्ञानशर्ममन्त्री तिष्ठति केवलमसौ स्वरूपेण" इति, "विज्ञानोऽयं यद्यपि स्वामिभक्तस्तत्राप्यस्यासन्निधाने विविक्ते। भेदो राज्ञस्तस्य तैस्तैरुपायैः शक्यः कर्तुं ज्ञानशर्मोपजापैः" इति च द्वितीयाङ्के (३७, ४० श्लो) ज्ञान-विज्ञानशर्मणोः समकालसमदेशावस्थानस्य च परस्परानुकूल्यस्य च दुर्घटत्वं सम्यक् सूचितमास्ते। जीवराजे वात्सल्यातिशयेन स च सङ्कटः पशुपतिना संप्रति परिहृतः। 'सतां सद्भिः सङ्गः' इति न्यायेन साधुद्वयस्य सौहृदोत्पादनम्, ज्ञानविज्ञानयोः समवेतसाहाय्येन जीवस्य लोकद्वयेऽपि श्रेयस्साधनरूपप्रयोजनमिति फलद्वयमीश्वरेणानुगृहीतं युगपत्।

जीव इति। नेपथ्यप्रदेशात् एषा वार्ता कालस्य मुखादुदेति। जीवे-जीवराजे। शिवाभ्यां प्रापिता योगसिद्धिः-निर्बीजयोगफलं यस्य तस्मिन् सति। पार्वतीपरमेश्वरयोरनुग्रहवशात् कालेनैतावता निर्वर्तितस्य समाधिकर्मणः समुचिते फले जीवेन समधिगते सतीति भावः। कल्ये-प्रत्यूषे। (काल इति पाठो

ईशानस्य निदेशात् प्राप्ता साप्यत्र शाङ्करी भक्तिः ।
चत्वारोऽपि पुमर्थाः पुंभिर्यस्याः प्रसादतो लभ्याः ॥ ३१ ॥

मन्त्री—(आकर्ण्य) प्रियं नः प्रियम् । भगवान् काल एव एवं नः प्रियमाचष्टे ।

न साधुः ।) जनानाम् आन्ध्येन समं-दर्शनाशक्त्या सह । तमोवत्-नैशं तिमिरमिव । प्रभाते यथा ध्वान्तमखिलं स्वतः प्रविलीयते तथेत्यर्थः । पापः-दुरात्मा पापकर्मभिः समुद्भूतो वा । राजयक्ष्मा । विधूच्या स्वभार्यया सह । असाध्यैः गदैः सह-अपरैः स्वानुचरैर्दुरुपशमैर्व्याधिभिः साकम् । नाशमेति । व्युष्टा तमस्विनी नष्टाश्च जीवशत्रवः सपदीति कालपुरुष एवं ख्यापयति ॥ ३० ॥

अनिष्टनिवृत्तिपूर्वकम् इष्टप्राप्तिरपि घटत इति सूचयति **ईशानस्येति** । ईशानस्य-शिवस्य । निदेशात्-नियोगात् । सा शाङ्करी भक्तिः—"तामद्वैतां स्वरूपेण" (१ ४८) इति "दृङ्मात्रदर्शितनिजप्रथितप्रभावा" (४-१४) इति, "हृदयानन्दविधात्री" (४-१६) इति च पूर्वं बहुधा ख्यापितप्रभावा शिव-भक्तिरपि । अत्र प्राप्ता-जीवसमीपमागता । यस्याः प्रसादतः-अनुग्रहात् । पुंभिः-सत्कर्मप्रवृत्तैः पुरुषैः । चत्वारोऽपि-धर्मार्थकाममोक्षाख्याः । पुमर्थाः-पुरुषार्थाः । लभ्याः-अस्याः शिवभक्त्याः कृपयैव त्रैवर्गिकमापवर्गिकं च श्रेयः सकलमपि प्राप्तुं प्रभवन्ति मानवा इत्यर्थः । "शक्यं तत् खलु पुण्डरीक-नगरं" इति पद्ये (१-४७) मुखसन्धौ मनोरथबीजावापसमये यत् सूचितं तदिह निर्वहणसन्धौ फलत्वेनोपनतमिति कविना निर्दिष्टम् । जीवस्यापवर्गप्रापणविषये शिवभक्त्याः "सत्यज्ञाननिधिः" इति पद्ये चतुर्थाङ्के (श्लो. १९) यदौत्सुक्यं व्यग्रता च कविना प्रादर्शि, तादृशाभिमतार्थस्य फलेग्रहित्वमत्र संदर्शितमिति च ज्ञातव्यम् ॥ ३१ ॥

प्रियमिति । कालोऽस्माकमनुकूलः संपन्नः; अतः साक्षात् कालपुरुषः स्वयमेवं प्रियं नः प्राहेति मन्त्री ज्ञापयति । (काले एष एव इति पाठान्तरम् ।)

राजा—(सहर्षोल्लासम्)

मूर्धन्यमण्डलनिकेतसुधांशुबिम्ब-
निःष्यन्दशीतलसुधाप्लुतिनिर्वृताङ्गः ।
मेघावृतिव्यपगमे गगनं यथाच्छं
चैतन्यमावरणवर्जितमस्मि तद्वत् ॥ ३२ ॥

राजा स्वात्मनो हर्षातिशयं जीवन्मुक्तिदशायां समुपनतां निर्वृतिं चाह **मूर्धन्येति** । 'मूर्ध्नि भवं मूर्धन्यं-ब्रह्मरन्ध्रमित्यर्थः; तस्य मण्डलं-सहस्रदलपद्म-पत्राकारं स्थलम्; तदेव निकेतः-वासस्थानं यस्य तस्य, सुधांशोः बिम्बात् निष्यन्दः-स्रवः, तेन शीतला-अत्यन्तशिशिरा, या सुधा अमृतधारा, तस्याः प्लुत्या-सेकेन, निर्वृतानि-अनुभूतनिस्समाभ्यधिकसुखानि अङ्गानि यस्य सः । पूर्वमस्मिन्नेवाङ्के परमेश्वरेण "ब्रह्मरन्ध्रस्थितचन्द्रमण्डलनिःष्यन्दमानामृताप्लुत-शरीरम्" इति यत् सानुग्रहमाशासितं तदद्य तथैव फलात्मना परिणतमिति विशदीकृतम् । मेघावृतिव्यपगमे-मेघरूपाच्छादने सत्यपगते । गगनं-आकाशम् । यथा अच्छं-प्रसन्नम् । विलोक्यत इति शेषः । तद्वत् अहमपि । आवरणवर्जितं-मायोपजनितावियारूपावरणेन विरहितम् । अतिस्वच्छस्वरूपम् । चैतन्यं-केवल-ज्ञानात्मकम् । अस्मि । केवलं चिदानन्दस्वरूपमधिगत्य, तत्त्वमसीत्यस्याद्वैतिनां व्याख्यानरीत्या प्रतीक्ष्यमाणं ब्रह्मभूयं गतोऽस्मीति भावः ।

"शान्तं ज्योतिः कथमनुदितानन्दनित्यप्रकाशं
विश्वोत्पत्तौ व्रजति विकृतिं निष्कलं निर्मलं च ।
तद्वन्नीलोत्पलदलरुचामम्बुवाहावलीनां
प्रादुर्भावे भवति नभसः कीदृशो वा विकारः"

इति जीवात्मनो मायाप्रसङ्गेन प्रसज्यमानो विकारलेपः प्रबोधचन्द्रोदये (६-२३) निषेधपूर्वकमस्ति यो निर्वर्णितः, स एव जीवेनानुभूतचरः कोऽपि दोषः परमशिव-पराहतश्वासीत इत्यत्र वर्णितः ॥ ३२ ॥

मन्त्री—एवमेवायं जीवो राजा भगवतोः प्रसादान्नीरोगो नित्यमुक्तो निराबाधो बहुकालं जीयादिति प्रार्थये ।

परमेश्वरः—तथैवास्तु ।

देवी—तह होदु । (तथा भवतु ।)

राजा—(सहर्षविस्मयं मन्त्रिणं प्रति)

मन्त्रिन् जन्मैव दोषः प्रथममथ तदप्याधिभिर्व्याधिभिश्चे-
ज्जुष्टं कष्टं बतातः किमधिकमपि तु त्वन्मतेवैंभवेन ।
देव्या भक्त्याः प्रसादात् परमशिवमहं वीक्ष्य कृच्छ्राणि तीर्णः
सर्वाणि द्राक् तदत्यद्भुतमिह शुभदं संविधानं तवेदम् ॥ ३३ ॥

एवमेवेति । भगवतोः-पार्वतीपरमेश्वरयोः । प्रसादात्-अनुग्रहात् । नीरोगः-सकलामयनिर्मुक्तः । नित्यमुक्तः-जीवन्मुक्तो भूत्वा । निराबाधः-वैयन्तरदुः-खान्तरादिसङ्कटरहितः सन् । बहुकालं जीयात्-रसायनादिसेवाकारणात् च्यवनादय इव दीर्घायुषा सुखं जीवत्विति यावत् । भवद्व्यामेष राजा सांप्रतमनुगृहीतव्य इति मन्त्री प्रार्थयते ; तदानीमेव खलु त्रैवर्णिकश्रेयसि विहितलक्ष्यस्य विज्ञानशर्मणोऽस्य मनोरथः सेत्स्यति । **तथैवेति** । पूर्वमेव "निर्जितनिखिलविपक्षं . . . . सफलमनोरथमेनं कृतार्थयिष्यामि" इत्यादिभिः स्वयमेवाविष्कृतानुग्रहस्य परमेश्वरस्य सचिवप्रार्थनेयमतितरां प्रमोदवहा, स्वाभिलषितार्थस्य निर्वहणाय पाणिच्युतफलस्य पयसि पतनमिव सुतरामनुकूला चाभवदिति यावत् ।

श्वःश्रेयसस्य स्वोपलब्धस्य विज्ञानशर्मव्यवसायहेतुकत्वात् कार्तज्ञ्यं मन्त्रिणि राजा सूचयति **मन्त्रिन्निति** । मन्त्रिन् विज्ञानशर्मसचिव । जन्मैव-मनुष्यत्वेन जननमेव । प्रथमं-सर्वेषामपि गर्ह्यविषयाणामादौ । दोषः-दुर्गुणयुक्तम् ; निन्द्यमिति यावत् । अथ-कर्मवशाज्जन्माधिगमानन्तरम् । तदपि-जन्माधिगतं शरीरमपीत्यर्थः । आधिभिः-मानसीभिर्व्यथाभिः । व्याधिभिश्च-शारीरैरामयैश्च । जुष्टं चेत्-अभिभूतं

मन्त्री—राजन्,

बहुजन्मार्जितैः पुण्यैस्तावकैरेव तोषितः ।
सर्वाभीष्टं ददातीशः संविधानं किमत्र मे ॥ ३४ ॥

यदि भवति । अतः-एतादृशाद्दौस्थ्यादपि । अधिकमपि कष्टं किं-किं दौस्थ्यान्तरमितोऽप्यधिकतरमपि विद्यते । एकत्र व्याधिभिर्बहुविधैरङ्गेषु, अपरत्र विविधैराधिभिरन्तरङ्गे च सर्वदा पीड्यमाने ततोऽपि नान्या यातना भुवि तीव्रतरा स्यादिति स्वयमनुभवतो ज्ञात्वा, तत्कष्टस्य स्मरणमपि भयावहमिति निर्देष्टुं बतेति शब्दः प्रयुक्तः । अपि तु-किन्तु; दुस्तरत्वे सत्यपि तस्य सांसारिकदौस्थ्यसागरस्येति सूचयति अपि तु इति । त्वन्मतेर्वैभवेन-त्वदीयधिषणाकौशलबलेन । (त्वन्मतिप्राभवेन इति पाठान्तरम् ।) देव्याः-महाप्रभावशालिन्याः । भक्त्याः-शिवभक्त्याः । प्रसादात्-अनुग्रहादपि । अहम् । परमशिवं वीक्ष्य-प्रत्यक्षीकृत्य । सर्वाणि कृच्छ्राणि-समस्तान्यपि आधिव्याधिरूपाणि महादुःखानि । द्राक्-तीर्णः-अतित्वरितमेव उत्तीर्णः । इह-अस्मिन् सन्दर्भे । तदिदं-तदेतत्सकलमपि । तव-विज्ञानशर्मणः । शुभं-अन्ततः श्रेयस्करम् । संविधानं-कार्यनिर्वहणपरिपाटी । सश्रद्धं सनिपुणं च त्वदुद्यमासादितसंविधानक्रम एव झटिति श्रेय एतावदुदपादयदस्माकमिति सकौतुकमाह राजा ॥ ३३ ॥

बहुजन्मेति । बहुजन्मार्जितैः-'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते' इति प्रमाणानुरोधेन अतीतैर्जन्मसहस्रैरुपचितैः तावकैः पुण्यैः-त्वदुद्यमेन त्वयैव निर्वर्तितैः सुकृतविशेषैः; नान्यदीयैरिति एवकारार्थः । तोषितः-तृप्तिं प्रापितः । ईशः-परमेश्वरः । (तावकैरेष इति पाठे, एष पुरतोऽस्माकमाविर्भूत इश इत्यर्थः ।) सर्वाभीष्टं-सकलमपीप्सितम् अर्थम् । ददाति । अत्र त्वदुपात्तश्रेयोविषये । मे संविधानं किम् । त्वत्कृतैः सुकृतैः त्वदुपासनाबलेन च सन्तुष्टः परमेश्वरः श्वःश्रेयसमिदं ते प्रादात्, अहं त्वत्किञ्चित्करोऽस्मिन् विषय इति सचिवोत्तमः स्वस्य नैच्यानुसन्धानं निरभिमानितां चावेदयत्येवम् ॥ ३४ ॥

परमेश्वरः—वत्स, किमतःपरमन्यत्तव प्रियं कुर्मः ।

राजा—देवदेव भगवन्, सर्वमपि प्रियमाचरितमेव ।

सर्वेऽपि मे प्रशमिता रिपवः पुरेऽभू-
दारोग्यमैक्षिषि भवन्तमुमासहायम् ।
योगं ततस्त्वदुपदिष्टमवाप्य जीव-
न्मुक्तोऽस्मि ते करुणया किमतः प्रियं मे ॥ ३९ ॥

वत्सेति । अतःपरं-नीरोगतानिष्पादनपूर्वकं जीवन्मुक्तिप्रदानादधिकम् । अन्यत् प्रियं किं कुर्मः-न किमप्यतः परं श्रेयो विद्यतेऽवशिष्टमित्यर्थः । अनेन च "वरप्रदानसंप्राप्तिः काव्यसंहार उच्यते" इति काव्यसंहारलक्षणमङ्गमिहोपक्षिप्तम् । (किमतः परमपि प्रियं तव कुर्म इति पाठान्तरम् ।)

मनोरथपूर्तिम् अन्ततोऽयमाचष्टे राजा **सर्वेऽपीति**। मे पुरे-शरीराख्ये मम नगरे। सर्वेऽपि रिपवः-आधिव्याधिप्रभृतयः सर्वेऽपि शत्रवः । प्रशमिताः-अपहताः। किञ्च, पुरे शरीरे। आरोग्यं-नीरोगता च। अभूत्। दुष्टनिग्रहपूर्वकं शिष्टपरिपालनमिव सुबहुलरोगप्रशमनपूर्वकम् अरोगतास्थापनमपि शरीरे भवत्कृपया सम्पादितमिति भावः । उमासहायं-परमेश्वर्या सहितम् । भवन्तं-परमशिवमपि । ऐक्षिषि-साक्षादकार्षम् । ततः-त्वदुपात्तमनोरथपूर्त्यनन्तरम् । त्वदुपदिष्टम्। योगं-समाधिक्रमं च, ज्ञानयोगं वा । अवाप्य । ते करुणया-योगसिद्धिप्रापकार्थं प्रवृत्तया भवदीयानुकम्पया । जीवन्मुक्तोऽस्मि-जीवन्मुक्तिदशामपि प्राप्तवानस्मि । अतः-इतोऽधिकम् । मे-जीवस्य मम । किं प्रियं-प्रियान्तरं किमस्ति ; न किमप्यवशिष्यत इत्यर्थः । (प्रियं नः इति पाठान्तरम्) ॥ ३९ ॥

तथापीदमस्तु भरतवाक्यम् ।

पर्जन्यः समयेऽभिवर्षतु फलत्विच्छानुरूपं मही
प्रौढामात्यनिरूपिते पथि महीपालाः पदं तन्वताम् ।
कर्णालङ्कृतये भवन्तु विदुषां कान्ताः कवीनां गिरो
भूयादस्य कवेश्चिरायुररुजो भक्तिश्च शैवी दृढा ॥ ३८ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति सप्तमोऽङ्कः ।

श्रीमद्भारद्वाजकुलजलधिकौस्तुभस्य श्रीनरसिंह्मरायमन्त्रिवरनन्दनस्य श्रीमदानन्दराय-मखिनः कृतिषु **जीवानन्दनं** नाम नाटकं समाप्तम् ।

तथापीति । तथापि-एवं जीवस्य मे सत्स्वपि परिपूर्णेषु मनोरथेष्वित्यर्थः । इदं-वक्ष्यमाणरूपम् । भरतवाक्यं-भरत इति नाट्याध्यक्षः, तस्य वाक्यं तदाशंसोक्तिः । अस्तु-तदाशंसितं फलमपि संपन्नं भवत्विति यावत् ।

शुभशंसनं नाम नाटकान्तिमाङ्गं भरतस्याशंसनमेवाभिधीयते **पर्जन्य इति** । पर्जन्यः-मेघः । समये-यथाकालम । अभिवर्षतु-अभितो जनपदेषु आपः सिञ्चतु । मही-भूमिः । इच्छानुरूपं-प्रजानाम् अभीप्सितानुकूलं यथा तथा । फलतु-जनैराकाङ्क्षितानि आवश्यकानि धान्यानि सस्यानि फलानि च विशिष्योत्पादयत्वित्यर्थः । (फलं वाच्छानुरूपं महीम् इत्यसाधुः पाठः ।) महीपालाः-राजानः । प्रौढामात्यनिरूपिते-प्रज्ञाधिकेन प्रधानमन्त्रिणा निर्दिष्टे । पथि-नीतिमार्गे । पदं तन्वतां-चरन्तु ; अभिज्ञस्य प्रशस्तानुभवशालिनः प्रधान-सचिवस्य साधूपदेशाननुरुध्य राज्यकार्यनिर्वहणं नृपाः समाचरन्त्विति भावः । कवीनां-सुकवीनाम् । कान्ताः-शब्दतोऽर्थतश्च सरसाः । गिरः-वाचः । विदुषां-

सहृदयानाम् । कर्णालङ्कृतये-श्रोत्रतर्पणाय । भवन्तु । सुकवीनां सरसा एतन्नाटकादिरूपा वाचः सुधियो व्यपगतेर्ष्याः सादरमाकर्ण्य सानुमोदनं प्रमोदं च प्रकटयन्त्विति भावः । अस्य कवेः-आनन्दरायमखिनः । अरुजः-अपगतव्याधेः सतः ; नीरोगदृढशरीरस्येत्यर्थः । चिरायुः-दीर्घं जीवितम् । भूयात् इति शिवमभ्यर्थयते । शैवी-शिवसंबन्धिनी । भक्तिश्च अस्य कवेः । दृढा-निश्चला । भूयात् । "अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः । यज्ञाद्भवति पर्जन्यः" इति जगतः क्षेमं पर्जन्यायत्तमिति गीतोक्तस्य प्रमाणस्य प्रस्तावाय प्रथमपदत्वेन नाटकस्यान्तिमश्लोके पर्जन्यपदं प्रयुक्तम् । एष कविः स्वकीयस्य विद्यापरिणयनाटकस्यापि भरतवाक्यात्मकेऽन्तिमपद्ये तदिदं गीतावचनमनुस्मारयन्नेव "पर्जन्यान्नमखक्रमेण जगतश्चक्रं तदावर्तताम्" इति नाटकमुपसंहरति । 'पर्जन्यादन्नसम्भवः' इत्यस्य व्याख्याने "जगच्चक्रप्रवृत्तिहेतुः" इति यदस्ति श्रीशङ्करभाष्यवचनं तदप्यनेन कविना "जगतश्चक्रं तदावर्तताम्" इत्युपात्तम् । अतश्च मन्महे, दृढयत्यस्मदाशयं यदेष कविरुभयोरपि स्वनाटकयोरुपसंहारे गीताचार्यमुखादुद्गतेन भाषितेनान्तिमं स्वकीयं शुभशंसनमाशासितवानिति ॥ ३८ ॥

इति वैद्यरत्नबिरुदाङ्कितेन आयुर्वेदभूषण-आयुर्वेदाचार्याद्युपाधिभाजा मेल्पाक्कं पण्डित दुरैस्वाम्यय्यङ्गारमहोदयेन जीवानन्दनमूलग्रन्थस्य समग्रस्य च संशोधनपूर्वकं विरचितायां **नन्दिन्याख्यायां व्याख्यायाम्**

सप्तमोऽङ्कः ।

BIBLIOGRAPHY

APPENDIX I

। अनुबन्धः प्रथमः ।

Medical Works and authors cited in the commentary Nandini.

नन्दिनीव्याख्यायामुपात्तानां वैद्यकग्रंथानां ग्रंथकर्तृणां च नामानि ।

(ग्रंथादिनाम्नामनन्तरं दत्ताः संख्या ग्रन्थस्यास्य पुटाङ्कान् निर्दिशन्ति ।)

अष्टाङ्गसंग्रहः, २३३
अष्टाङ्गहृदयम्, २२८, २३७, ३९५
आयुर्वेदप्रकाशः, ३९९
गदनिग्रहः, ४२७, ४३२
चक्रदत्तः, २७९, ४३०, ४३२
चरकः, ३१, ६०, ८७, ९६, ११६, १५९, १६४, २३६, २३७, २८९, ३०१, ३५७, ३७२, ३७३, ३७६, ३७७, ३७८, ४०७
दृढबलः, ७९
धन्वन्तरिः, २, ६०
धन्वन्तरिनिघण्टुः, १६५, २७४
नरहरिपण्डितः, २२८
बृन्दः (बृन्दमाधवः), ३४५
भावमिश्रः, २३५, ३४७
भैषज्यरत्नावली, ४२३, ४३१, ४३२
माधवकरः (माधवनिदानम्), ३२, ८७, ९६, १४४, ३७६, ३७८, ३८१, ४३०
योगरत्नाकरः, ४०२, ४२२, ४३३
रसकामधेनुः, ४३१
रसचिन्तामणिः, ३९८, ४३१
रसपारिजातः, ४०३
रसप्रकाशसुधाकरः, ४००
रसमञ्जरी, ४३१
रसरत्नसमुच्चयः, ४७, ११३, १६०, १६१, १६२, १६३, १६४, १७२, ३९९, ४०१, ४०५
रसरत्नाकरः, ३८४, ४०५
रसराजसुन्दरः, ३८४, ४०५

रससारसंग्रहः, ४०१, ४३१
रसेन्द्रचिन्तामणिः, ४०१
रसेन्द्रसारसंग्रहः, १६१
राजनिघण्टुः, २४, ११२, २२४, २२५, २७९, ३४४
रुग्विनिश्चयः(मा०निदानम्), ३१, ७७, ३७५, ३८२
वाग्भटः, ११५, १३६, २२८, २३१, २३३, २७५, २८१, २८२, २८३, २८४, २८५, २९५, ३५१, ३५६, ३६१
विजयरक्षितः, ९९
वीरसिंहावलोकनम्, ३७९
वृद्धसुश्रुतः, ३७५
वैद्यकम्, ४७
वैद्यचिन्तामणिः, ४३२
शार्ङ्गधरः(शा. संहिता), ८७, ८८, ९९, १४४, २२८, २३६, २७९, ३४९, ३५९, ३८१, ३८२, ३८३, ३९९, ४०१, ४०३, ४०४, ४२०, ४२१, ४२४, ४३०, ४३२, ४५०
सिद्धयोगः(दृश्यतां बृन्दः)
सुश्रुतः, ३२, ४१, २२८, २२९, २३०, २३१, २३२, २३४, २३५, २३६, २३७, २३८, २७९, २८०, २८१, २८४, २९४, ३००, ३०८, ३१५, ३४३, ३४६, ३४७, ३५१, ३७२, ३७७

BIBLIOGRAPHY

APPENDIX II

। अनुबन्धो द्वितीयः ।

Non-Medical Books and Authors

वैद्येतरग्रंथा ग्रंथकर्तारश्च ।

अमरकोशः ८, ९, १६, १७, १८, २३, २५, २८, ४०, ५१, ६३, ७१, ८४, ९२, १०५, ११८, १२०, १२९, १३२, २४५, २७१, २७९, २८९, ३००, ३७९, ४१०, ४३३, ४५१, ४५४, ४६२, ४७०

उत्तररामचरितम् , १५८

उपदेशसहस्री, ३२७, ३२८

एकादशीतत्त्वम्, ४७०

कङ्कालमालिनीतन्त्रम् , ४६२

कठवल्ली, ३२५

कवितार्किकसिंह्याः, (दृश्यतां वेदान्त-देशिकः ।)

कादम्बरी, १०५, ३११, ३१२

कालिकापुराणम् , ५४, ५६

कालिदासः, ७८, २२४, २५१, २७२, ३३७, ३३८, ४५०, ४५६

किरातार्जुनीयम् , २२६, ४४२

कुमारसंभवः, २२४, २५१, ३३७, ३३८, ३८७, ४३८, ४४७, ४४८, ४५०, ४५६, ४५९

कूर्मपुराणम् , ३३४

गीता (दृश्यतां भगवद्गीता ।)

गीताभाष्यम् (श्रीशाङ्कर), २९५, २९६, ३२८, ४८३

गोदास्तुतिः (श्रीवेदान्तदेशिकस्य), २१२

चम्पूरामायणम् , ९१, ४४३, ४४५

चाणक्यः, ३६

छान्दोग्योपनिषत् , ६

तन्त्रसारः, २६

तैत्तिरीयोपनिषत् , ६०, ३२८, ४५२

त्रिपुरविजयचम्पूः, (हरविजय) ५२

दयाशतकम् (श्रीवेदान्तदेशिकस्य), २१३, ४६१

दशरूपकम् , ७

देवीपुराणम् , २८८

नारसिंहपुराणम् , ४८

पातञ्जलयोगसूत्रम्, ४७१, ४७२
पादुकापञ्चकम्, ४६२
प्रबोधचन्द्रोदयम्, ४, २०७, २०९, २१५, २४७, २५६, २५७, २५८, ३१०, ३११, ३२६, ४५१, ४५२, ४६०, ४७२
ब्रह्मवैवर्तम्, २
भगवद्गीता, २८, २९५, २९६, ३१०, ३२१, ३८९, ४१५, ४६०, ४६१, ४६५, ४६६, ४६७, ४६८, ४८३
भरतः, १७, १८, ४२, २०३
भर्तृहरिः, १७६
भवभूतिः, ४६४
मत्स्यपुराणम्, १६४, २४९, ४५०
मनुः, १२८
महाभारतम्, ५२, ९२, ३२२, ३३७, ३३८, ४१३, ४१४, ४३८, ४४२, ४४३, ४४७, ४६०
महावीरचरितम्, ४११
माघः, ८३, ९६, १३३, १५७, १९४, २७२, २८६, २८७, ३२२, ३२३, ३६३
मार्कण्डेयपुराणम्, ४८, ५४, ५६, ५७
मालतीमाधवम्, ४३८, ४६४
मुण्डकोपनिषत्, ४६५
मुद्राराक्षसम्, ३६, १४०, २९०
मुरारिः, ३१८, ४१४
मृच्छकटिकम्, २५५
मेघसंदेशः, २२४
मेदिनी, २१
यजुर्वेदः, १७०, १७१
यतिराजसप्ततिः (श्रीवेदान्तदेशिकस्य), १०६
रघुवंशः, ७, २०९, २४९, ३०३, ३८६, ३८७, ४३८
रामायणम्, ७३, ९१, ३९०, ४११, ४१३, ४४५
लिङ्गपुराणम्, ३००
वराहपुराणम्, १८८
वसिष्ठः, १९, २३
वह्निपुराणम्, ४६४
वामनपुराणम्, ५६, ५८
विक्रमोर्वशीयम्, १३०, ३४८
विद्यापरिणयम्, १०, ४८३
विश्वगुणादर्शचम्पूः, ४६०
वेदान्तदेशिकः, १०६, १२१, २१३, ४६९
वैजयन्ती, ९०, १४७, १५४, २५४, ३९०, ४५९
शब्दमाला, ६८
शाकुन्तलम्, ७८, १३०, ३०४
शाकुन्तलव्याख्यानम् (वेङ्कानसश्रीनिवासाचार्यस्य) ११०
शाण्डिल्यसूत्रम्, ६२, २०५
शान्तिशतकम्, ३८८
शिशुपालवधम्, (दृश्यतां माघः।)
शुक्रनीतिः, ६७, १३७, २९१
श्रीधरस्वामी, ३२६
श्रीभागवतम्, ४४६, ४४७, ४४९
श्रीविष्णुपुराणम्, २१५
श्रीशङ्कराचार्यः, ३२७, ३२८, ३८३

श्रुतिः, २४७, २९५, ३२५, ३२८, ३८८, ३९०, ४५१, ४५२
षट्चक्रनिरूपणम्, ४६३
सङ्कल्पसूर्योदयः, ४, १२१, २१३, २४०, ३०१, ३०९, ३९३, ३९७, ४०७, ४६०, ४६९
सूर्यसिद्धान्तः, २२८
स्कान्दः, ११
हठयोगप्रदीपिका, २९
हरिवंशः, ३७२
हेमचन्द्रः, २३

APPENDIX III

। अनुबन्धस्तृतीयः ।

Diseases etc. referred to in the text and the commentary

मूलकोशे व्याख्याने च निर्दिष्टा विविधा रोगादयः ।

अतिवुभुक्षा (भस्मकः), ३२९,३३३,३३९
अतीसारः, ९७, ४२५
अपची, ३५०
अपथ्यता (रुचिमती), ३३०,३६३,३६५
अम्लपित्तम्, ४२६
अरुचिः, ४२६
अर्बुदम्, ३५०
अर्शांसि, ९३, ९४, ४२८
अश्मरी, ९६, ४२८
आमज्वरः, ४२३
आमवातः, ३८२
आहारविहारेषु अपथ्यम्, २७४
उदररोगः, ३८०, ४२६, ४२७
उदावर्तः, ३८०
उन्मादः, ८९, ३८३
कर्णमूलः, १०२
कर्णरोगाः, ४२९
कर्मप्रभावः, २९५, २९६
कालपरिमाणानि, २९९, ३००
कालप्रभावः, २९७, २९८, २९९, ३३६
कासः, ६५, ६६
कुष्ठः, ८९, ३५०
क्रिमिरोगाः, ३८०, ३८१
गरविषम्, ४२३, ४२५
गलगण्डः, ८३, ३५०
गुदकीलकाः, ३७८
गुल्मः, १००, ३७९, ४२८
ग्रहणी, ४२५
ग्रहाविष्टलक्षणम्, ४२९
चर्मदलम्, ३४७
छर्दिः, ६७, ४२७
जंगमविषाणि, ४२३
ज्वरः ३७२, ३७४, ४२२, ४२५
ज्वरराजः, ३७१, ३७२
तिलकालकः, ३४६
त्रयः प्रकृतयः, ३७, ११५

दश विषाणि, ४२३
दोषाणां चय-प्रकोप प्रशमाः, २२७, २२८, २२९, २३०, २३१, २३२, २३७
नेत्ररोगाः, ३८०, ३८१, ४२९
न्यच्छः, ३४६
पद्मिनीकण्टकः, ३४३
पाण्डुः, ८१, ४२५
पित्तरोगः, ३८०
पुंस्त्वरोगाः, ४२८
प्रमेहाः, ८८, ९५, ४०५
प्राणादिवायवः, २७८, २७९
प्लीहरोगः (प्लीहोदरः), १००, ३५९
भगन्दरः, ३७८, ४२८
भस्मकरोगः, ३३०
भूतोन्मादाः, ३८२
मन्दाग्निः, ३८०
मुखरोगाः, ३८०, ३८१
मूत्रकृच्छ्रम्, ३७९, ४२८
मूत्राघातः, ३७८
मूर्छाः, ३८२
यक्ष्मा, ३१, ३३, ४०, ४७, १५८, १५९, ३१७, ३९४, ३९५, ३९६, ४२५
रक्तविसर्पः, ३५६
राजयक्ष्मा (दृश्यतां यक्ष्मा)
रुचिमती (अपथ्यता), ३६८
रोगराजः (दृश्यतां यक्ष्मा)
वातरोगाः, ३८०
वायूनां (पञ्चानां) स्थानानि, २७८, २७९, २८०
विद्रधिः, ३५६
विषाणि, ४२३
व्यङ्गाः, ३४५, ३४६
व्रणाः, ९१
शिरोरोगाः, ३८०, ३८१, ४२९
शूकदोषः, ४२७, ४२८
शूलम्, ३७९, ४२८
शोफाः, ३८०, ३८१
श्लेष्मरोगाः, ३८०
श्वासरोगाः, ७६, ७७, ४२७
श्वित्रम्, १६४, ३४८, ३४९
संग्रहग्रहणी, ४२४, ४२५
सन्निपाताः, ८३
सप्तधातवः, ३५५
सिध्मकुष्ठम्, ३४३
स्त्रीरोगाः, ४२५
स्थावरविषाणि, ४२३
हिक्का, ७९
हृद्रोगः, ३८३

APPENDIX IV

। अनुबन्धश्चतुर्थः ।

Medicines etc. cited in the text and in the commentary

जीवानन्दने नन्दिनीव्याख्याने च निर्दिष्टानि औषधादीनि ।

अग्निकुमाररसः, ४००, ४०१
अमृतागुग्गुलुः, ३६०
आनन्दभैरवरसः, ३९८, ३९९
आम्रपेश्यादिलेपः, ३४७
आरोग्यचिन्तामणिरसः, ३९८, ३९९,४२३
कनकसुन्दररसः, १६०
कफकुञ्जररसः. ३६०
कफचिकित्सा, ११७
कुसुमायुधरसः, १६५
गन्धकः, ५०, १६५, १७०
गिरिकर्णिकादिविधिः, ४३२
गुञ्जातैलम् , ४३२
गुञ्जाफलादिलेपनम् , ३४४
गुटिकाः, ४२०, ४२१
गुडूच्यादिक्काथः, ४२१
गोक्षुरादिचूर्णम् , ४२७, ४३०
ग्रहणीकपाटरसः, ४२४
चन्द्रप्रभा, ३५८, ३५९
चन्द्रोदयवर्तिः, ४३२
चिन्तामणिरसः, ४०६
ज्वराङ्कुशरसः, ३९८, ३९९, ४२४
त्रिनेत्ररसः, ४३१
त्रिविक्रमरसः, ४२७, ४३०
त्रैलोक्यचिन्तामणिरसः, ४२२
नवायसचूर्णम् , ४३२
नित्योदितरसः, ४३१
पञ्चभद्रक्काथः, ४२१
पञ्चामृतपर्पटी, ४२५
पारदादयो रसाः, ११४
पित्तचिकित्सा, ११७
पूर्णचन्द्रोदयरसः, ५, ४००
प्रतापलङ्केश्वरः, ४०१, ४०२
प्रमेहगजकेसरी, ४०५
फाणितम् , २१७
बडबानलचूर्णम् , ४०२, ४०३
मञ्जिष्ठादिलेपः, ३४५
मण्डपाकः, ४२०
मण्डभेदाः, ४२०

मदनसुन्दररसः. १६५
महातालेश्वररसः, ३४९
महावह्निरसः, ४३१
मृगाङ्कपोटली, १६०
मेहकुञ्जरकेसरी, ४३२, ४३३
रसः, ५९, ११३, ११४, १५४, १६२, १६३, १६५, १७०, १७७
रसभूपतिः, ३९८
रससिन्दूरम्, ३९८
राजमृगाङ्कः, १६०, ३९९
राजयक्ष्मचिकित्सा, १५९
लघुलङ्केश्वररसः, ४३१
लवणपञ्चकम्, ३५९, ३६०
वसन्तकुसुमाकररसः, ४०२, ४०३
वाजीकरणम्, १६५
वातकुठाररसः, ४०४
वातचिकित्सा, ११६
वातराक्षसः, ४००, ४०१
वातविध्वंसनरसः, ४०५, ४०६
विद्याधररसः, ४३१
वृष्यम्, १६६
शस्त्राणि अस्त्राणि च, २८२, २८३, २८४, २८५
सप्तकञ्चुकदोषाः, १७२
सप्तकञ्चुकदोषनिराकरणम्, १७२
सिद्धार्थकादिविधिः, ४३२
सिद्धयोगरसः, ४२७, ४३०
सिद्धरसेश्वरः, ४००, ४०१
सुदर्शनचूर्णम्, ४०३
सुवर्णभूपतिरसः, ४०२, ४०३
सूक्ष्मैलादिचूर्णम्, ४२७
सूतेन्द्रः, १६५
सौभाञ्जनादितैलम्, ४३२
हरिद्राक्षारः, ३४४

। मुद्रणदोषशोधनम् ।

ERRATA

(एते मुद्रणदोषाः ग्रन्थस्य पठनात् पूर्वं समीकरणीया इत्यभ्यर्थ्यते ।)

अशुद्धः	शुद्धः	पृष्ठः	पंक्तिः
आसदिति	आसीदिति	४	२६
व्यञ्जनयावर्णः	व्यञ्जनयोर्वर्णः	१९	१०
वार्णितम् ।	वर्णितम्	४९	१६
स्वल्योद्दिष्टः	स्वल्पोद्दिष्टः	६२	२०
व्यवहित	अव्यवहित	६८	२३
मस्त्क	मस्तक	६९	२
सव	सर्वे	८३	३
करिष्यध्वं	करिष्यध्वे	८९	१४
र्वत्क्त्रो	र्वक्त्रो	९५	४
मूछन्तश्च	मूर्छन्तश्च	९७	८
श्वयभुः	श्वयथुः	१०२	७
प्रषितो	प्रेषितो	१०४	६
निगमार्थनां	निगमार्थानां	१०९	१७
मासादितुं	मासादयितुं	१२१	१६
इत्वरी	इत्वरीः	१३९	१४
धनागरस्य	धनागारस्य	१३९	१९

अंशः	शुद्धः	पुटः	पंक्तिः
वर्त्माद्यश्रया	वर्त्माद्याश्रया	१४४	१३
प्रयोक्त्तुं	प्रयोक्तुं	१५५	२
कलङ्केन	कलङ्केन	१५६	६
सूदः	सूदाध्यक्षः	१८३	२४
पौरोगव	पौरोगवं	१८४	१६
स्तातुमिति	स्नातुमिति	१९७	१५
प्रसूनोक्करः	प्रसूनोत्करः	२२२	४
तादीनामोषधि	दीनामोषधि	२३३	३
वशद्याच्च	वैशद्याच्च	२३३	१७
अष्टङ्ग	अष्टाङ्ग	२३७	२२
पट्	षट्	२४५	४
प्रणिधित्वेत	प्रणिधित्वेन	२४६	१३
इद	इदं	२५९	८
स्वैरव	स्वैरेव	२८६	१
बुभुषुः	बुभूषुः	३०७	१८
देहाभि मानेन	देहाभिमानेन	३२०	२०
कौमें	कौमें	३३४	२१
पुष्टैर्दह	पुष्टैर्देह	४१२	२२
नारायणांश भूतस्य	नारायणांशभूतस्य	४४३	१२